22

कालविद्धपणाम्

॥श्रीपरमात्मनेनमः श्रीशंकराचार्यगुरुपादुकाभ्योनमः प्रचंडपाखंडैर्नोघतंत्रयीशिरोर्थप्रतिपादनेरतं बुधेंद्रैर्नुतंयोगकलाभिराद्र
तंनमामितंशंकरदैशिकंततं १ इहसकलशिष्टाग्रणीर्भगवान्शंकराचार्यःजिज्ञासुजनानुकंपयासकलवेदांतसिद्धांतरहस्यप्रदर्श
नपरंवेदांतप्रकरणमारभमाणस्तत्रादौश्रीगुरुनमस्कारलक्षणंमंगलाचरणमार्यावृत्तद्वयेनाकरोत् श्रीगुरुमिति श्रीगुरुचरण
द्वंद्वंश्रीगुरूणांपदसरोजद्वयंवंदेनमस्करोमि अहंप्रकरणकर्त्ताकिंलक्षणंचरणद्वंद्वंमथितदुःसहद्वंद्वंमथितमुन्मूलितंदुःसहं
मुमुक्षूणामसह्यंद्वंद्वंद्वैतंयेनतत् तत्किंयस्यचरणद्वंद्वस्यपांसुमयंरजः प्रचुरंभक्तितंभस्मतद्गोरूपाविभूतिर्भ्रांतिग्रहोपशां

श्रीगुरुचरणद्वंद्वंवंदेहंमथितदुःसहद्वंद्वं भ्रांतिग्रहोपशांतिंपांसुमयंयस्यभक्तिमातनुते ॥१॥ दैशिकवरंदयालुंवंदेहं
((निहतसकलसंदेहंयच्चरणद्वयमद्वयमनुभवमुपदिशतितसदस्यार्थं २

तिंभ्रांतिरेवग्रहोपस्मस्तस्योपशांतिंविनाशंतनु
तेविस्तारयतिसंपादयतीत्यर्थः १ दैशिकवरमिति तंदैशिकवरंदैशिकेष्वाचार्येषुवरंश्रेष्ठं दयालुंकृपाशीलंगुरुमहंवंदेनो
मिकिंलक्षणंनिहतसकलसंदेहंनिहतानाशिताःसकलासर्वेसंदेहास्तदयशंकवःयेनासौनिहतसकलसंदेहस्तंसकःपच्चरण
द्वयंपदसरोजद्वंद्वमद्वयंद्वैतरहितमनुभवंसाक्षात्स्वरूपबोधमुपदिशतितस्यदस्यार्थं अनुभवविशेषणमेतत् तसदलस्यार्थं
गुरुनतिरूपंमंगलाचरणंतुमुख्यत्वात्गुरुदेवतयोरैक्यचिंतनंविघाप्राप्तावंतरंगमितिश्रुतिरपि यस्यदेवेपराभक्तिरित्यादिका

एमः१

ननु नाहमस्मीत्येवंप्रकारकोऽपि कस्यचित्तस्य जायतेऽनुभवः कथमहमस्मीत्येवंनुभवस्तत्राह नाहमितीति नाहमितिवे
त्ति यो सौ नाहमस्मीति यो जानाति सोऽसः नास्तीति नास्तित्वसाक्षित्वेनापि मत्समवाप्यं ब्रह्मैव वेत्ति आत्मानमेव जानाति अह
मस्मीति विजानन् अहंप्रत्ययगोचर आत्मा सर्वदा विद्यमानस्तिष्ठतीत्यनुभवन्नसौ पुरुषः ब्रह्मैव विजानात्यनुभवति स्वयं
विना प्रयासेनेत्यर्थः ५ नन्वस्तित्वनास्तित्वप्रत्ययाभ्यां ब्रह्मैवानुभूयत इति चेत्किमिति सर्वैर्नानुभूयते त आह ब्रह्मत्वमेवे
ति तस्माद् अस्तित्वनास्तित्वसाक्षित्वात् स्वस्य ब्रह्मत्वमेवानुभूयते सर्वैः अतस्त्वमेव ब्रह्मास्तर्हि नाहं ब्रह्मेति अनुभवस्य का गति

2 नाहमिति वेत्ति यो सौ सत्यं ब्रह्मैव वेत्ति नास्तीति अहमस्मीति विजानन् ब्रह्मैवासौ स्वयं विजानाति ॥५॥ ब्रह्मत्वमे
व तस्मान्नाहं ब्रह्मेति मोहमात्रमिदं मोहेन भवति भेदः क्लेशाः सर्वे भवन्ति तन्मूलाः ॥ ६ ॥

रित्यत आह ॥ नाहं ब्रह्मेति यत्त्वानमहं ब्रह्म न भवामीति यत्त्वानं तदिदं मोहमात्रं भ्रान्तिरेवाऽविद्याजनितत्वात् स मोहः सर्वान
र्थजनक इत्याह मोहेनेति मोहेन भवति भेदः नाहं ब्रह्मेति भ्रान्त्या भेदो भवति भेदो नाम क्लेशादिभिः कलुषीकृतपरिच्छिन्न
जीवस्वरूपो जीवत्वलक्षणः भवति जायते सर्वेऽपि क्लेशा अविद्यास्मितारागद्वेषाभिनिवेशाः अनित्याशुचिदुःखानात्मसु
नित्यशुचिसुखात्मख्यातिरविद्या दृग्दर्शनशक्त्योरेकात्मतैवास्मिता सुखानुशयी रागः दुःखानुशयी द्वेषः स्वरसवाही वि
दुषोऽपि तथारूढोऽभिनिवेशः इति पंचसूत्राणि पतंजलिनोक्ता अविद्यादिक्लेशानां लक्षणभूतानि तन्मूला भेदजनिता भ
वन्ति अतोऽविद्याजनितनाहंब्रह्मेति जीवोहमिति भेदबुद्धिस्त्याज्येत्यर्थः ॥ ६ ॥ एम: २

इदानीमधिकारिविषयसंबंधप्रयोजनात्मकमनुबंधचतुष्टयं निरूपयति तन्निरूपणस्यावश्यकत्वात्तत्र प्रथमतः अधिकारिस्वरूपमाह संसारेति संसार एव दावः गहनं तस्य पावको दावानलस्तेन संतप्तः परमोद्विग्नः अत एव सकलसाधनोपेतः सर्वसाधनयुक्तः साधनानि तु नित्यानित्यवस्तुविवेक इहामुत्रफलभोगविरागशमादिषट्कसंपन्मुमुक्षुत्वानि चत्वारि एवंभूतोऽधिकारी स्वात्मनिरूपणनिपुणैस्तत्त्वंपदार्थैक्यप्रतिपादनयोग्यैर्वाक्यैरुपनिषद्वचनैः शिष्यः अधिकारी गुरुणा ब्रह्मनिष्ठेन प्रबोध्यते नु परिदृश्यते तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं तस्मै स विद्वानुपसन्नाय सम्यक् प्रशांतचित्ताय शमान्विताय इति श्रुतेः दैशिकोपदेशलभ्यैवेयं ब्रह्मविद्या न स्वबुद्धिस्वातंत्र्यतर्कादिना वा ॥ ३ ॥

संसारदावपावकसंतप्तः सकलसाधनोपेतः स्वात्मनिरूपणनिपुणैर्वाक्यैः शिष्यः प्रबोध्यते गुरुणा ॥ ३ ॥

अस्तित्वमयमिहास्मिन्ननर्थकस्यास्ति संशयः पुंसः अत्रापि संशयश्चेत् संशयिता यः स एव भवसि त्वं ॥ ४ ॥

इदानीमात्मनस्त्रैकालिकसत्ताप्रदर्शनार्थं विद्वदविद्वत्साधारणानुभवेनात्मनोऽस्तित्वं साधयन्विषयं प्रदर्शयति अस्तीति अस्तित्वमयमिहास्मिन्ननर्थे आत्मायमस्ति कालत्रयाबाध्यस्तिष्ठतीत्यनुभवैकस्यापि पुंसः विद्वतो वाऽविद्वतो वा पुरुषस्य संशयः संदेहः अस्ति किं कस्यापि नास्तीत्यर्थः स्वस्यात्मा तिष्ठतीति सर्वैर्मनुष्यैरनुभूयते असन्नेव स भवति असद्ब्रह्मेति वेद चेत् अस्ति ब्रह्मेति चेद्वेद संतमेनं ततो विदुरिति श्रुतेः अत्रापि आत्मनोऽस्तित्वेऽपि संशयश्चेत् यः संशयिता संदेहकर्ता स एव त्वं आत्मा भवसि अस्तित्वनास्तित्वयोरनुभविताऽसावेवेत्यर्थः ॥ ४ ॥

इदानीं प्राणमयकोशस्य स्वरूपदर्शनपूर्वकमनात्मत्वं साधयति कोशप्राणमय इति प्राणमयः प्राणाविः कारो वायुवि
शेषो वपुष्यवछिन्न अन्नमयकोशांतर्गतः प्राणमयनामा कोशो भवति अस्य प्राणमयकोशस्य कथमात्मता स्यादात्मता न
संभवतीत्यर्थः कुतो न संभवतीत्यत आह क्षुत्तृष्णाभ्यामशनायापिपासाभ्यां पीडामुपेयुषः विकलतां प्राप्नुवतः आत्मा क्षुत्तृ
ड्भ्यां नातीत इत्यर्थः १० इदानीं मनोमयकोशस्याप्यनात्मतां साधयती कुरुत इति कुरुते करोति वपुष्यहंतां शरीरेऽहमि
त्यभिमानमयमेव गेहादौ गृहादिविषयेषु ममतां ममैते गृहा इत्यो विषयादिष्वभिमानं यः मनोमयः कोशः किंलक्षणो राग

3

कोशः प्राणमयोयं वायुविशेषो वपुष्यवछिन्नः अस्य कथमात्मता स्यात् क्षुत्तृष्णाभ्यामुपेयुषः पीडां ॥१० कुरुते वपुष्य
हंतां गेहादेषु यः करोति ममतां च रागद्वेषविधेयो नासावात्मा मनोमयः कोशः ११ सुप्तौ स्वयं विलीना बोधे व्याप्ताकलेवरं स
कलं विज्ञानशब्दवाच्या चित्प्रतिबिंबा न बुद्धिरप्यात्मा १२

नोमयः कोशः रागद्वेषविधेयः रागद्वेषैर्विधीयते तेनासौ रागद्वेषविधेयः
रागद्वेषधर्मीत्यर्थः अस्यो मनोमयः कोश आत्मा न भवति रागद्वेषादिहेतुत्वादित्यर्थः ११ इदानीं विज्ञानमयकोशस्याप्यना
त्मत्वं साधयति सुप्ताविति सुप्तौ सुषुप्त्यवस्थायां स्वयं स्वरूपेण विलीना लयं प्राप्ता भवति बोधे च जाग्रदवस्थायां सकलं नखशि
खाग्रपर्यंतं कलेवरं शरीरं व्याप्ता व्याप्नोति इति विज्ञानशब्दवाच्या विज्ञानमयकोशाभिधेया बुद्धिरपि चित्प्रतिबिंबा यस्यां चित्तावरतो
तु चैतन्यप्रतिबिंबतां याति सा आत्मा न भवति सुषुप्तौ विलीनत्वादित्यर्थः ॥१२॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ

रामः ३

इदानीं यतो भेदमूला क्लेशा भवंती सुक्रमतस्तदाश्रयान्पंचकोशान्विवेचयेदित्याह नक्लेशपंचकमिति इदं क्लेशपंचकमविचारि
कं कृतपंचकोशविवेकः पुरुषः न भजते नाश्रयते अतएव कुशलधियो विवेककुशलाः पुरुषाः सततं पंचकोशान् विचिन्वं
ति विचारयंति पंचकोशस्थिताः क्लेशा नात्मधर्मा इति निश्चयं कुर्वंतीत्यर्थः ७ ननु कोशानां विवेचनेन किं फलमित्यत आ
ह अन्नमाप्नोति नाममिनिरूपितानामेतेषामन्नमयादिकोशानां विवेकाद्विवेचनादात्मप्रकाशतामपरोक्षत्वं याति प्रा
(प्नोति किं लक्षणानां कोशानामेकैकांतर॥

न क्लेशपंचकमिदं भजते कृतकोशपंचकविवेकः अतएव पंचकोशान् कु
शलधियः सततं विचि[illegible]न्वंति ७ अन्नप्राणमनोमयविज्ञानानंदपंचकोशानां एकैकांतरभाजां भजति विवेका
त्मप्रकाशता आत्मा ८॥ वपुरिदमन्नमयाख्यः कोशो नात्मा जडो घटप्रायः प्रागुत्पत्तेः पश्चात्तदभावस्यापि दृश्य
(मानत्वात्॥९

प्नोति किं लक्षणानां कोशानामेकैकांतरभाजां एकस्यैकस्यांतरे मध्ये तिष्ठतां अन्नमये प्राणमयः प्राणमये
मनोमय इत्यादिक्रमेण तिष्ठतां ८ इदानीं पंचकोशानां स्वरूपदर्शनपूर्वकमनात्मत्वं साधयति तत्र प्रथममन्नमयकोशस्य
स्वरूपमाह वपुरिति वपुरिदमन्नमयाख्यः कोशः इदं शरीरमन्नमयनामा कोशः अयं कोश आत्मा न भवति जडत्वाज्जन्यत्वा
न्नाशित्वानुमाह वपुरिति वपुरिदमन्नमया घटं यथा घटो जडो जन्यश्चेति अत्रोत्तरार्धेन युक्तिरपि प्रदर्श्यते नुत्पत्तेः प्राक् पश्चाच्च
विध्वंसानंतरमपि तदभावस्यापि तस्याऽविद्यमानत्वस्य दृश्यत्वादनुभूयमानत्वात्तस्मादात्मेतद्विलक्षणस्तद्धेतुरित्यर्थः॥९

सदृशः घटप्रायः घटइवदृष्टांतवचनं घटसदृशः

इदानीमात्मतत्त्वस्वरूपं प्रदर्शयति यः स्फुरति बिंबभूत इति यः स्फुरति बिंबभूतः बिंबत्वेन देहद्वयाधिष्ठानत्वेन स्फुरति प्रकाशते
स आनंद एव आनंदस्वरूप एव सकलात्मा सर्वेषां प्राणिनामात्मा तत्र हेतवः प्रागूर्ध्वमपि अन्नमयादीनामुत्पत्तेर्विना
शोत्तरं सत्त्वात् विद्यमानत्वात् अविकारित्वाद्विकाररहितत्वादबाध्यमानत्वाद्बाधायोग्यत्वाद्विज्ञानमानंदं ब्रह्मेत्यादिश्रुतिभ्यश्चा
स्मात्त्रिविधपरिच्छेदशून्यम आनंदस्वरूपः सिद्धः १४ ननु अन्नमयाद्याः यथानुभूयंते तथा साक्षि च सर्वैः कुतः ॥ छ ॥ छ ॥

यः स्फुरति बिंबभूतः स भवेदानंद एव सकलात्मा प्रागूर्ध्वमपि च सत्त्वादविकारित्वादबाध्यमानत्वात् १४ अन्नमयादेरस्मा
4 दपरं यदि नानुभूयते किंचित् अनुभवितान्नमयादेरस्तीत्यस्मिन्न कश्चिदपलापः १५ ॥ छ ॥ छ ॥ छ ॥ छ ॥

नानुभूयतेऽत एतद्व्यतिरिक्त आत्मा नास्तीति चेदुच्यते अन्नमयादेरिति अन्नमयादेरस्मात्सर्वानुभवगोचरात्कोशपंचकादपर
मात्मतत्त्वं नानुभूयते किंचित्किमपि वस्त्विति चेदुच्यते तर्हि अन्नमयादीनामनुभविता तेषां ज्ञाता एतेऽन्नमयादय इति ज्ञानवानयो
स्तीत्यस्मिन्नर्थे कस्यचित्कस्यापि पुरुषस्यापलापो भ्रांतिरस्ति नास्तीत्यर्थः सर्वैरपि घटादिज्ञेयपदार्थात् ज्ञाता भिन्न एवेत्यनुभू
यते १५ ॥

इदानीमानंदमयकोशस्यानात्मत्वं प्रतिपादयति सुप्तिगतैरिति सुप्तिगतैः सुखलेशैः सुषुप्तावनुभूयमानसुखलवैः सुखीभवा
मीति सुखमहमस्वाप्समिति योभिमनुते जानाति सः सावानंदनामाकोशः अहंकारशब्दवाच्यः सोहंकारः आत्मा कथं भवेत् न भवती
त्यर्थः एतेन पंचकोशानात्मत्वनिराकरणेन तत्तच्छ्रुतियुक्त्याभासप्रतिपादितबौद्धादिवादिनिराकरणं बोध्यं तत्रान्नमयाद्या
त्मत्वप्रतिपादिकाः श्रुतयस्तैस्तैर्वादिभिः प्रयुज्यंते तेषामयमाशयः यतो वा इमानि भूतानि जायंते तद्रूसनपाप्सु सा जगत्कार
णत्वं खलु ब्रह्मणो लक्षणं प्रतिपादितं तच्च तत्तत्कोशब्रह्मत्वप्रतिपादिकाभिः श्रुतिभिः प्रतिपाद्यते तास्त्र श्रुतयः अन्नं ब्र
ह्मेति व्यजानादि सुपक्रम्य अन्नाद्ध्येव खल्विमानि भूतानि जायंते तद्रूसंतेनान्नमयस्य ब्रह्मत्वं प्राणो ब्रह्मेति व्यजा। नादि सुप

सुप्तिगतैः सुखलेशैरभिमनुते यः सुखीभवामीति आनंदकोशनामा सोहंकारः कथं भवेदात्मा ॥ १३ ॥ ६२ ॥ ६२ ॥

क्रम्य प्राणाद्ध्येव खल्विमानि भूतानि जायंते तद्रूसंतेन प्राणमयस्य ब्रह्मत्वं मनो ब्रह्मेति व्यजानात् मनसो ह्येव खल्विमानि भूतानि जा
यंते तद्रूसंतेन मनोमयस्य विज्ञानं ब्रह्मेति व्यजानात् विज्ञानाद्ध्येव खल्विमानि भूतानि जायंते तद्रूसंतेन विज्ञानमयस्य आनंदो ब्रह्मेति व्य
जानात् आनंदाद्ध्येव खल्विमानि भूतानि जायंते तद्रूसंतेन आनंदमयस्योपक्रमोपि तत्र प्रदर्शितैस्तैः तच्च न संभवति श्रुतौ नामन्याख्याता ब्रह्मत्वं
सर्पोत्।। प्रतिकोशोपासनार्थत्वात्तासां तत्र तत्र ब्रह्मदृष्टिः कर्त्तव्येति।। यथा शालिग्रामादिप्रतिमादिषु विष्ण्वादिबुद्धिस्तद्वत्तस्माद्बौ
द्धादिवादिनोऽविघातृत्तद्धयद्द्वतिप्रासंगिकं निरूपितं।। १३।।

इदानीमिदमित्साधाकारेण स्फुरिते वस्तुनि बाध्यमाने यद्वस्तु स्फुरति स आत्मेत्याह इदमिति इदमिदमिति प्रतीते वस्तुनि इद
दं वस्तु इदं वस्त्विति साकारेण ज्ञाते वस्तुनि पदार्थे बाध्यमाने बाधिते सति यदनिदमिदं न ब्राह्यमबाध्यं बाधामति योगित्वं त
द्रूपं तत् स्वब्रह्मणः सत्वात्कालत्रयेपि विद्यमानत्वान्नवयरोहत्वं सर्वदा अनुभूयमानत्वादबाध्यत्वमपरोक्षत्वं चेत्यर्थः
१९॥ नन्ववेद्यत्वे न ब्रह्मणः परोक्षत्वं भविष्यतीत्यत आह नावेद्यमिति ब्रह्मावेद्यमप्यविज्ञेयमपि परोक्षं न भवति कुतः
स्वयंप्रकाशत्वात् स्वप्रकाशरूपत्वाद्यत्स्वप्रकाशरूपं तद्वेद्यं न भवति यथा सूर्यः ननु स्वप्रकाशरूपत्वमेव ब्रह्मणः कथमि
त्यत आह सत्यमिति सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतिरेव तत्स्वब्रह्मणो

इदमिदमिति प्रतीते वस्तुनि सर्वत्र बाध्यमानेपि अनिदमबाध्यं तत्त्वं स
त्वादेतत्स्वनच परोक्षं स्यात् १९ नावेद्यमपि परोक्षं भवति ब्रह्म स्वयंप्रकाशत्वात् सत्यं ज्ञानमनन्तं ब्रह्मेत्येतत्सल्लक्षणं प्रथिते। २०
सति कोशपञ्चकस्युपाधौ संभवतस्तस्य जीवतेश्वरते नो चेत्तयोरभावाद्विगतविशेषं विभाति निजरूपं २१॥ छ॥ छ॥

लक्षणं सत्यं ज्ञानानन्तात्मकं [illegible] प्रथिते प्रकटयति सतोऽबाध्यत्वं च स्वप्रकाशत्वं च ब्रह्मणः सिद्धमित्यर्थः॥ २० ननु सर्वोपाधि
रहितस्य ब्रह्मणः कथं जीवत्वमीश्वरत्वं च श्रुतिभिः प्रतिपाद्यते तत्राह सतीति कोशपञ्चकस्युपाधौ अन्नादिकोशरूपामाया
शक्तिरविद्या तद्रूपस्तु उपाधौ सति विद्यमाने सति तस्य ब्रह्मणः जीवतेश्वरते जीवईश्वर इति विभेदव्यवहारो भवति नो चेत्कोशप
ञ्चकस्युपाधिर्नास्तीति चेत्तयोरभावाज्जीवत्वेश्वरत्वयोरभावाद्विगतविशेषं विशेषरहितं निजं स्वरूपमात्मस्वरूपं विभाति प्रका
शते सर्वोपाधिविलये स्वप्रकाशानंदरूप आत्मैव प्रकाशत इत्यर्थः॥ २१॥

नन्वनुभवनीयपदार्थानुभविताऽन्य आत्मपदार्थोऽस्तीति चेत्तस्यापि कश्चिदनुभविताऽपेक्षत इति चेदुच्यते स्वयमिति स्वयमेव स्वस्या
त्मानोऽनुभवस्वरूपत्वाद्यद्यपि तस्यात्मनः अनुभाव्यत्वमनुभवगोचरत्वं नास्तीत्येतावता सूर्यादिप्रकाशकस्येव अपि कालेऽभावशंकाऽ
स्माना स्तीत्येवं प्रकारेण न भवेन्न जायते बोधरूपसत्ताया ज्ञानस्वरूपविद्यमानत्वस्य कालत्रयेऽपि ज्ञानस्वरूपत्वेनात्मनोऽभावो
न संभवति जगद्गंध्यप्रसंगादित्यर्थः १६ अनुभवस्वरूपस्यात्मनोऽनुभाव्यत्वं न भवतीति दृष्टांतप्रदर्शनेनोच्यते अनुभवती
ति आत्मानुभवरूपो विश्वं सर्वं तदनुभवति जानाति विश्वेन सर्वजगताऽसौ आत्मा न चानुभूयते अनुभवगोचरीन क्रियते। अ

स्वयमेवानुभवत्वाद्यद्यप्येतस्य नानुभाव्यत्वं सत्त्वस्त्यभावशंकानभवेद्बोधस्वरूपसत्तायाः॥ १६॥ अनुभवति विश्वमा
त्माविश्वेनासौ न चानुभूयेत खलु प्रकाश्यते सो विश्वमशेषं प्रकाशयन्नु भानुः १७॥ तदिदंतादृशमीदृशमेतावत्तावदि
ति च पन्न भवेत् ब्रह्मन्तदित्यवधेयं नो चेद्विषयो भवेत्सरणेऽस्य च १८॥

विद्याकार्यत्वाद्विश्वस्य खलु निश्चयार्थे अत्र पतत्र दृष्टांतः भानु
रविः विश्वं जगदशेषं समग्रं प्रकाशयन्भासयन्नु विश्वेन जगता क्वाप्यसौ न प्रकाश्यते प्रकाश्यस्याविद्यारूपत्वात्॥ तस्मादनु
भवप्रकाशरूपत्वात्कालत्रयेऽप्यात्मनोऽभावशंकानभवतीत्यर्थः १७ इदानीं जिज्ञासब्रह्मणः स्वरूपमाह तदिदमिति तस
र्णेऽस्य चेदमपरोक्षं तादृशमुपमानगोचरमीदृशं प्रत्यक्षविषयस्वरूपमेतावदेतावत्परिमाणं तावत्तावत्प...रिमाणं परिच्छिन्नं न भवेत्न
भवति तर्हि ब्रह्मकथमवधेयमित्याकांक्षायामाह ब्रह्मेति ब्रह्मात्मस्वरूपं तदित्यवधेयं ज्ञातव्यं पदुक्तप्रकारं तदिदंतादृशमीदृशमे
तावदिति परिच्छेदरहितं तद्ब्रह्मावधेयमिति पन्नरोः संबंधः नो चेदन्यथा विषयो भवेत् प्रमाणविषयत्वं स्याद्ब्रह्मणः परोक्षत्वं च तस्मा

इदानीं पदार्थज्ञानाधीनत्वाद्वाक्यज्ञानस्येत्युक्रमतो पदार्थविचारमाह देहेंद्रियादिधर्मानिति तत्र प्रथमं तत्त्वमसीति वाक्ये पदत्रयं तत्र तत्व
त मसीति त्वंपदस्यार्थद्वयं वाच्यो लक्ष्यश्चेति तत्र प्रथमतस्त्वंपदवाच्यार्थं दर्शयति देहेंद्रियादि धर्मानित्यादिना देहेंद्रियादिधर्मान् स्थूलत्वकृ
शत्वदेहधर्मान् काणत्वबधिरत्वादीन्द्रियधर्मानात्मनि त्वेत्रहे आरोपयन् अभेदेन तादात्म्येनाध्यस्यन् स्थूलोहं कृशोहमित्याकारेण देहध
र्मारोपः काणोहं बधिरोहमित्याकारेणेन्द्रियधर्मारोपः एवमारोपपूर्वकं कर्तृत्वाभिमानी यो बोधः विज्ञानकोशप्राणाद्यारोपपूर्वकं कर्ताहमि
त्यभिमानात्मको यो बोधः स्याद्बोधो भवति स त्वंपदस्य वाच्योर्थः एनं शबलार्थमित्यपि वदंति २५ इदानीं त्वंपदस्य लक्ष्यार्थमाह देहा

देहेंद्रियादिधर्मानात्मन्यारोपयन्नभेदेन कर्तृत्वाद्यभिमानी बोधः स्यात्त्वंपदस्य वाच्योर्थः ॥ २५ ॥ देहादेरिंद्रियाणां साक्षी तेभ्यो वि
लक्षणत्वेन प्रतिभाति यो बोधः सोऽसौ त्वंपदस्य लक्ष्योर्थः २६ वेदावसानवाचा संवेद्यं सकलजगदुपादानं सर्वज्ञताद्युपेतं चै
तन्यं तत्पदस्य वाच्योर्थः २७ ॥ विविधोपाधिर्मुक्तं विश्वातीतं विशुद्धमद्वैतं अक्षरमनुभववेद्यं चैतन्यं तत्पदस्य लक्ष्योर्थः २८

हंतेंद्रियाणामिति देहाहंतेंद्रियाणां शरीराहंकारकरणानां साक्षी च ते तेभ्यो देहादिभ्यो विलक्षणत्वेन तत्स्विन्नत्वेन यः बोधः प्रतिभासते ऽसौ
त्वंपदस्य लक्ष्योर्थः देहाद्युपाधिरहितत्वात् शुद्धस्त्वमित्यर्थः २६ इदानीं तत्पदस्यार्थं विभजते वेदावसानवाचेति वेदावसानवाचोपनिषद्वाक्यैर्य
पं संवेद्यं ज्ञेयं ब्रह्म सकलजगदुपादानं प्रपंचकारणमथच सर्वज्ञताद्युपेतं सर्वज्ञत्वादिलक्षणं चैतन्यं चिद्रूपं तत्पदस्य वाच्योर्थः जगत्कारणत्वस
र्वज्ञत्वोपाधिविशिष्टत्वादित्यर्थः २७ इदानीं तत्पदलक्ष्यार्थमाह विविधोपाधिविमुक्तमिति विविधोपाधिविमुक्तं कर्तृत्वज्ञातृत्वलक्षणो
पाधिरहितं विश्वातीतं प्रपंचरहितं विशुद्धमज्ञानरहितम

तरणवाद्वैतं द्वैतरहितमक्षरं विनाशरहितमनुभववेद्यमनुभव
गम्यं प्रत्यगात्मस्वरूपं तत्पदस्य लक्ष्योर्थः ॥ २८ ॥

एमः ६

ननु सर्वोपाधिविलये सति किमपि नावशिष्यत इति चेत्तत्राह सतीति सकलदृश्यबाधे सति न किमप्यस्तीति यल्लोकसिद्धं चेदस्तु नाम यत्न किमपीति सिद्धं न किमपीत्यनेन शब्देन प्रतिपादितं तद्ब्रह्मेति वेदान्तनुपनिषद्वाक्यैः सिद्धं प्रतिपादितं यल्लोके किमपि नावशिष्यते सर्वबाधतदुपनिषद्वाक्यैरस्तीति प्रतिपाद्यत इत्यर्थः २२ पंचकोशविवेकेन तत्साक्षितया ऽऽत्मा पृथक्प्रतिपादितः इदानीं पंचकोशविवेकरतामपि तत्त्वमस्यादिवाक्यार्थज्ञानेन विना आत्मबोधो न भवतीत्याह एवमपीति एवं पंचकोशविचारयुक्तानामपि तत्त्वमस्यादिवाक्यचिंतनया विचारेण विरहितानां वाक्यविचारशून्यानामेष प्रसन्नोऽप्यात्मा परो

सति सकलदृश्यबाधे न किमप्यस्तीति लोकसिद्धं चेत् यत्न किमपीति सिद्धं ब्रह्म तदेवेति वेदतः सिद्धं २२ एवमपि विरहितानां त
त्त्वमसीत्यादिवाक्यचिंतनया प्रतिभासेत परो न वरात्मा प्रसक्तमप्रकाशमानोऽपि २३ तस्मात्सदर्थशोधनपूर्वकं वाक्यस्य चिंतया
(अन्वर्थे दैशिकवरदयाप्रभावादपरोक्षयति तरणेन चात्मानं २४॥

त्ववत्प्रतिभाति स्वप्रकाशमानो भातीत्यर्थः प्रसक्त्या प्रकाशमानोऽपि सर्वत्र सर्वदा भासमानोऽपि वाक्यार्थविचाराभावान्न भातीत्यर्थः २३ तस्माद्वाक्यविचारः कर्तव्य इत्याह तस्मादिति तस्माद्यतो वाक्यविचारेण विना ऽऽत्मज्ञानं न संभवति तस्माद्धेतोर्वाक्यविचारस्यावश्यकत्वात्तस्य च पदार्थज्ञानाधीनत्वात्सदर्थशोधनपूर्वकं वाक्यार्थचिंतयानुविचारयन्नधिकारी तरणेनात्मानमपरोक्षयति साक्षात्करोतीति केवलं स्वबुद्ध्यैव वाक्यविचारणात्मानुभवो न भवति किंतु दैशिकदयाप्रभावात् गुरुकरुणासामर्थ्यात् भवति गुरुमुखतः विचारे क्रियमाणे आत्मलाभो भवति नान्यथेति भावः २४ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ

सा च लक्षणा त्रिविधा जहदजहज्जहदजहल्लक्षणाभेदात् । तत्र प्रथमतः जहल्लक्षणामाह निखिलमपीति निखिलमपि समग्रमपि वाच्यं पदवाच्यमर्थं सत्यक्त्वा तदन्विते वाच्यार्थान्विते ऽन्योऽर्थो भिन्नार्थे या पदस्य वृत्तिः सा जहल्लक्षणोच्यते कुत्र सा जहल्लक्षणा भवतीत्याह गंगायां घोषइत्यत्र यथा इयं जहल्लक्षणा तत्त्वमसीति पदयोर्न ग्राह्या अत्र समग्रपदार्थस्य त्यागाभावात् सहार्थैकदेशग्रहणात्तत्र न संभवतीति भावः ३३

इदानीं अजहल्लक्षणामाह वाच्यार्थमिति वाच्यार्थं पदघोसर्थमत्यजं सा अजहत्सा यस्या वृत्तेः प्रवृत्तेरन्यार्थे वाच्यादन्यार्थे भिन्नार्थे पारिवर्तनं सा ऽजहतीति लक्षणा कथिता ऽलंकारिकैरित्यर्थः तस्या उदाहरणमाह शोणो धावतिवदिति शोणो धावतीत्य ॥ ६२ ॥ ६२ ॥

निखिलमपि वाच्यमर्थं सत्यक्त्वा वृत्तिस्तदन्विते ऽन्यार्थे जहतीति लक्षणा स्यात् गंगायां घोषइतिवन्न ग्राह्या ३३ वाच्यार्थमत्यजं साय स्या वृत्तेः प्रवृत्तिरन्यार्थे इयमजहतीति कथिता शोणो धावतिवदत्र न ग्राह्या ३४ ॥ जहदजहतीति सा स्याद्या वाच्यार्थैकदेशमपहाय बोधयति चैकदेशं सोऽयं द्विज इतिवदाश्रयेदेनां ३५॥

त्र शोणगुणस्य धावनासंभवात्तद्गुणा ऽश्वग्रहणं छोणगुणस्य सा गादिष

मजहतीयं लक्षणा ऽस्मिन्वाक्ये न ग्राह्या वाच्यार्थस्य सागात् ३४ इदानीं जहदजहल्लक्षणामाह जहदजहतीति जहदजहती वाच्यार्थस्य सागाद्धत्यार्थस्य ग्रहणात् या वाच्यार्थैकदेशं वाच्यार्थलक्षणोपरकदेशस्तमपहाय सत्यक्त्वा एकदेशं बोधयति लक्ष्यार्थलक्षणमेकदेशं बोधयति प्रकाशयति सा जहदजहल्लक्षणा तस्या उदाहरणं सोऽयं द्विज इति सोऽयं देवदत्त इत्यत्र तत्तदेतद्देशकालवैशिष्ट्यपरित्यागेन देवदत्तस्वरूपमात्रस्य ग्रहणादेनां जहदजहल्लक्षणामाश्रयेदंगीकुर्यात् ॥ ३ ॥

एमः ८

एवं पदार्थे विवेचिते सति वाक्यार्थबोधः सामानाधिकरण्यत्रितयज्ञानेन विना न भवत्यतः सामानाधिकरण्यत्रितयं दर्शयति सामानाधिकरण्यमिति सामानाधिकरण्यं नामैकार्थनिष्ठत्वं पदयोः तदनु तदनंतरं विशेष्यता विशेषणविशेष्यता विशेषणं नाम पदार्थयोर्विशेषणविशेष्यभावः लक्ष्यलक्षकत्वं लक्ष्यलक्षकत्वं नामात्मनो लक्ष्यलक्षकत्वभाव एवं त्रिविधः संबंधः २९ इदानीं सामानाधिकरण्यस्य स्वरूपमाह एकत्रवृत्तिरिति भिन्नप्रवृत्तिहेतूनां भिन्नार्थनिष्ठानां शब्दानामेकत्रैकस्मिन्नर्थे वृत्तिः वर्तनं सामानाधिकरण्यं सामानाधिकरण्यशब्दवाच्यं भवतीत्येवं लाक्षणिका लक्षणप्रतिपादका वदंति ३० इदानीं तत्त्वमसीत्यस्मिन्वाक्ये लक्षणां विना बोधो न भवत्यतो लक्षणाया आ

सामानाधिकरण्यं तदनु विशेषणविशेष्यता चेति अथ लक्ष्यलक्षकत्वं भवति पदार्थात्मनां च संबंधः ॥ २९ एकत्रवृत्ति
रर्थे शब्दानां भिन्नप्रवृत्तिहेतूनां सामानाधिकरण्यं भवतीत्येवं वदंति लाक्षणिकाः ३० ॥ प्रत्यक्त्वं परोक्षत्वं परिपूर्ण
त्वं सद्वितीयत्वं इतरेतरं विरुद्धं तदिह भवितव्यमेव लक्षणया ॥ ३१ ॥ मानांतरोपरोधान्मुख्यार्थस्यापरिग्रहे जाते मुख्या
विनाकृतेऽर्थे या वृत्तिः सैव लक्षणा प्रोक्ता ॥ ३२

वश्यकत्वमित्याह प्रत्यक्त्वं परोक्षत्वमिति प्रत्यक्त्वपरोक्षत्वयोर्विरोधात्परिपूर्णत्वसद्वितीयत्वयोरपि तथात्वात् इदं द्वयं परस्परविरुद्धं सहानवस्थानात् अतः तदिह लक्षणया भवितव्यं तत्त्वंपदयोरर्थ एवं विरुद्धार्थत्वाद्विरुद्धार्थत्यागेनाखंडार्थबोधाय लक्षणा स्वीकर्तव्येत्यर्थः ३१ इदानीं लक्षणास्वरूपमाह मानांतरोपरोध इति मानांतरोपरोधे प्रमाणांतरसंचारे मुख्यार्थस्य प्रतिपाद्यार्थस्यापरिग्रहे जाते सति मुख्याविनाकृतेऽर्थे मुख्यार्थसंबंधेऽर्थे पदानां या वृत्तिः वर्तनं यत्सैव लक्षणा प्रोक्ता लक्षणप्रतिपादकैरित्यर्थः लक्षणास्वरूपमुक्तं काव्यप्रकाशे मुख्यार्थबाधे तद्योगे रूढितोऽर्थप्रयोजनात् अन्योऽर्थो लक्ष्यते यत्सा लक्षणा प्रोच्यते बुधैरिति ॥ ३२ ॥

प

इत्याक्षेप उत्तरमाह विधिरिति विधिरेव विधिवाक्यमेव प्रवृत्तिं जनयतीति न विधिरेव प्रवर्त्तक इति न किंतु अभिलषितवस्तुबोधोपि इष्टसि
तपदार्थज्ञानमपि प्रवर्त्तयति। अभिलषितबोधस्य प्रवर्त्तकत्वे दृष्टमित्यत आह राजेति राजा भवति सुतो भूदिति बोधेन लोकः स्वयमे
व प्रवर्त्तते राजा भवतीति बोधे राजप्रार्थनादिप्रवृत्तिर्लोकस्य स्वयमेव भवति प्रवर्त्तकवाक्याभावेपि सुतो भूदित्यत्रापि जातकर्मादौ प्रवर्त्तते
तस्माद्विधिवाक्यमेव प्रवर्त्तकमिति नेति भावः ५० इदानीं विधिविलक्षणैरपि तत्त्वमस्यादिवाक्यैः केवलैर्गुरुकृपां विना ऽऽत्मसाक्षात्का
रो न भवतीत्याह ऐक्यपरैरिति ऐक्यपरैरखंडार्थप्रतिपादकैर्वाक्यैस्तत्त्वमस्यादिवाक्यैः स्वतन्निरंतरं प्रकाशमानोपि स्वरूपेणाभा

विधिरेव न प्रवृत्तिं जनयत्यभिलषितवस्तुबोधोपि राजा भवति सुतो भूदिति बोधेन प्रवर्त्तते लोकः ५० ऐक्यपरैः श्रुतिवाक्यैरात्माश
श्वत्प्रकाशमानोपि दैशिकदयाविहीनैरपरोक्षयितुं न शक्यते पुरुषैः ५१ विरहितकाम्यनिषिद्धो विहितानुष्ठानविमलस्वांतः
भजति स्वयमेव बोधं गुरुणा किमिति त्वया न मंतव्यं ५२॥

समानोप्यात्मा दैशिकदयाविहीनैर्गुरुकृपाविधुरैरपरोक्षयितुं साक्षात्क
र्तुं न शक्यते न पार्यते पुरुषैः पंडितैरपीत्यर्थः गुर्वनुग्रहलभ्येयं ब्रह्मविद्या सर्वविद्यावरिष्ठत्वात् ५१ इदानीं कर्मोपासनादिभिः स्वच्छस्वां
तः शुद्धाधिकारी वाक्यार्थविचारेण स्वयमेवात्मसाक्षात्कारवान् भवति किं गुरुणेत्यत आह विरहितकाम्यनिषिद्ध इति विरहितका
म्यनिषिद्धस्त्यक्तकाम्यनिषिद्धकर्मा विहितानुष्ठानविमलस्वांतः नित्यनैमित्तिककर्माचरणनिर्मलांतःकरण अधिकारी स्वयमेव बो
धं भजति साक्षात्कारवान् भवति गुरुणा किं गुरोः किं प्रयोजनं तत्त्वस्य कारणमशिष्यप्रज्ञैव केवलेति वशिष्ठोक्तेरिति त्वया आरे

8

[illegible]

रामः८

तामेवलक्षणांप्रतिपादयति सोयमिति सोयंद्विजइतिवाक्यंसोयंदेवदत्तइतिवाक्यंसत्काहित्वापरोक्षापरोक्षदेशाद्यंतत्कालैतत्कालत
द्देशैतद्देशविशिष्टत्वंहित्वाद्विजमात्रलक्षकत्वाद्देवदत्तस्वरूपमात्रज्ञापकत्वात्तदर्थयोरैक्यंस्वरूपमात्रंकथयति अखंडार्थबोधन
त्वादियमत्रत्याख्येत्यर्थः ३६ प्रतिपादितांजहदजहल्लक्षणांतत्वमस्यादिवाक्येयोजयति तद्वदिति तद्वत्सोयंदेवदत्तइतिवाक्यवत्तत्वमसी
तिवाक्यमपिपरोक्षापरोक्षत्वादीनितत्पदगतंपरोक्षत्वंत्वंपदगतमपरोक्षत्वंसत्काहित्वाऽद्वयचिद्वस्तुलक्षयित्वाचैतन्यस्वरूपमात्रंल
क्षयित्वाऽक्षिपदेनस्पष्टमसंदिग्धमैक्यंतत्त्वंपदार्थयोरैक्यंबोधयतिदर्शितप्रकारेणवाक्यार्थ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ

सोयंद्विजइतिवाक्यंसत्कापरोक्षापरोक्षदेशाद्यंद्विजमात्रलक्षकत्वात्कथयसैक्यंपदार्थयोरुभयोः ३६ तद्वत्तत्वमसीतिसत्काप
रोक्षापरोक्षत्वदेशादीनिचिद्वस्तुलक्षयित्वाबोधयतिस्पष्टमक्षिपदेनैक्यं ॥ ३७ ॥ इत्थंबोधितमर्थमहतावाक्येनदर्शितैक्येनअ
हमस्मिपरोक्षपतांवेदोवेदयतिवीतशोकत्वं ३८ प्रायःप्रवर्त्तकत्वंविधिवचसांलोकवेदयोर्दृष्टंसिद्धंबोधयतोर्थंकथमेतद्भवति तत्वमस्यादेः
मेतम्भवति एतत्प्रवर्त्तकत्वंनसंभवतीत्यर्थः ३९ ॥

बोधवतांफलंदर्शयति इत्थमिति इत्थंउक्तप्रकारेणबोधितमर्थंवाक्यार्थंदर्शितैक्येनवाक्येनतत्वमस्यादिवाक्येनअहमितिदर्शितंचैतन्य
स्वरूपमात्मतत्वंतदहमस्मीत्यपरोक्षयतांसाक्षात्कुर्वतांमधिकारिणांवीतशोकत्वंशोकरहितत्वंब्रह्मत्वंवेदउपनिषद्भागःवेदयति
बोधयति एवंवाक्यार्थज्ञानेसति अविद्यानिवृत्तिएनंदाप्तिश्चभवतीत्यर्थः ३८ ननुविधिवचसामेवप्रवर्त्तकत्वंनतत्वमस्यादिवाक्यानां
विध्यर्थवादविलक्षणत्वादित्याशंक्याह प्रायइति प्रायःबहुधाप्रवर्त्तकत्वंप्रवृत्तिजनकत्वंविधिवचसांविधिवाक्यानांलोकवेदयोःलौ
किकवाक्येवेदवाक्येचदृष्टंसिद्धमर्थंबोधयतःब्रह्मरूपमर्थंप्रकाशयतस्तत्वमस्यादेर्वाक्यस्यकथ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ

इदानीं प्रमाणान्तरबोधकबोधे मानान्तरापेक्षा नास्तीत्याह मानमिति मानं प्रमाणं प्रबोधपर्यन्तं प्रमाणानामपि बोधकं बोधं ज्ञानं येन प्रमाणेन
न प्रमाणेन बुभुत्सन्ते बोद्धुमिच्छन्ति ते ऽज्ञा एधोभिरिन्धनैर्दहनं दग्धुं वाञ्छन्ति दाहकस्वरूपेण दाहं कर्तुमिच्छन्ति ते महात्मानस्ते ऽसन्त विद्वांस इति
स्वोपहासं वचनं सर्वप्रकाशकस्वरूपस्य यथा अन्यप्रकाशापेक्षा नास्ति तद्वदात्मनोऽपि बोधरूपस्य बोधकान्तरापेक्षा नास्तीत्यर्थः ४६ ननु वे
दस्योत्पत्तिमत्त्वे ऽनादित्वं स्वबोधकत्वं कथमित्याशङ्कायामाह वेद इति वेदः अनादिः आदिरहित उत्पत्तिरहितः अमुख्यवेदस्य ईशव्यं
जकः प्रकाशकः यथा स्वतः सिद्धस्य घटादेर्व्यञ्जकं चक्षुस्तद्वत् ननु ईश्वरस्यापि तथा परप्रकाश्यत्वं स्यादत आह स्वयं ॥ ५॥ ६॥ ७॥

मानं प्रबोधयन्तं बोध्यं मानेन ये बुभुत्सन्ते एधोभिरेव दहनं दग्धुं वाञ्छन्ति ते महात्मानः॥ ४६॥ वेदो ऽनादिरमुख्यव्यञ्जक ईशः स्वयं प्रका
शात्मा तदभिव्यक्तिमुदीरस्त्रौत्रैः सोऽस्तूरिभिः प्रमाणमिति ४७ रूपाणामिव लोके चक्षुरिवान्यत्र कारणं दृष्टं तद्वददृष्टवग-
तौ वेदवदन्यो न वेदको हेतुः ४८॥ निगमेषु निश्चितार्थं तन्त्रे कश्चिद्यदि प्रकाशयति तदिदमनुवादमात्रं प्रामाण्यं न तस्य वि
द्यति न किंचित् ४९॥

मिति ईश्वरस्तु स्वयं स्वरूपेण प्रकाशात्मा प्रकाशरूप एव न तु प्रकाश्यः तदभिव्यक्तिमुदीरसे ईश्वरस्य अभिव्यक्तिः प्रकटत्वं उक्तेस्ताः ज्ञात्वा सूरिभि
पूर्वाचार्यैः सो वेदः प्रमाणमिति प्रोक्तः कथितः ४७ इदानीं दृष्टान्तप्रदर्शनेनात्मावबोधं प्रति वेदस्यैव प्रामाण्यं नान्यस्येति साधयति रूपा
णामिति रूपाणां नीलपीतादीनामिव लोके दर्शने चक्षुरिव नेत्रेन्द्रियमिवान्यत्कारणमन्यदिन्द्रियं न कारणं नास्तीत्यर्थः तद्वदेव तु दृष्टि
वददृष्टावगतौ अननुभूतार्थावगतौ स्वर्गादौ वा वेदहृदस्यादृष्टो ऽन्यः वेदको हेतुर्बोधहेतुर्नास्ति न तिष्ठति ४८ ननु निगमानां यथा स्वतः प्रामा
ण्यं तथा तन्त्राणामप्यस्त्वित्याशङ्कायामाह निगमेष्विति निगमेषु वेदेषु निश्चितार्थं प्रमाणीकृतार्थं कश्चिदाचार्यः तन्त्रेषु शास्त्रेषु प्रकाशयति
प्रतिपादयति तदिदं तत्प्रतिपादनमनुवादमात्रमुक्तस्यैवार्थस्य प्रकाशनं सा वचनं अनुवादो ऽवधारितस्य कथनं तु अनुवादस्य प्रामाण्यं न ॥ ६॥ ६

दृष्टा
न्तकार
णं ४

१

रामः ९

व ३

इदानीं कर्मभिरेव चित्तशुद्धिद्वारा बोधो भवतीत्युक्तं तन्निराकरोति कर्मभिरिति कर्मभिरेव विहितनित्यकर्मादिभिरेव बोधः आत्मसाक्षात्का
रो न भवति न जायते दयानिधिना कृपासमुद्रेण गुरुणा विना श्रोत्रियब्रह्मनिष्ठविशेषणविशिष्टेनाचार्येण विना न संभवति। कुत आ
चार्यवान्पुरुषो गुरूपसदनवान् वेद जानातीति सर्वस्य वेदसिद्धत्वात् आचार्यवान्पुरुषो वेदेति श्रुतेरित्यर्थः ४३ ननु सर्वप्रमाणे वेदे
ब्रह्मावबोधे वा गूढस्य वेदस्य कथं प्रामाण्यं पद्यं वा नष्टमुदितं येन वा गम्यते इति श्रुतेरित्याकांक्षायामाह वेदो नादितयेति वेदः ऋग्य
जुःसामाथर्वणाख्ये स्वरूपः अनादितया उत्पत्तिरहितत्वेन परमेश्वरप्रणीततया वा ईश्वरनिश्वासरूपेणाभिव्यक्तत्वेन वा एतस्य

कर्मभिरेव न बोधः प्रभवति गुरुणा विना दयानिधिना आचार्यवान् हि पुरुषो वेदेत्यर्थस्य वेदसिद्धत्वात् ४३ वेदो नादितया वा पद्मा
परमेश्वरप्रणीततया वा भवति परमं प्रमाणं बोधो नास्ति स्वतन्त्रपरतो वा ॥४४॥ नापेक्षते परं स्वघटपेक्षंते ऽखिलानि मानानि
वाक्यं तन्निगमानां मानं ब्रह्मण्यतीन्द्रियावगतौ ॥४५॥

महतो भूतस्य निश्वसितमेतद्यदृग्वेद इति श्रुतेः परमं प्रमाणं भवति सर्वप्रमाणश्रेष्ठं भवति ब्रह्मबोधकत्वात् उपनिषद्वाक्यप्रमाणव्यति
रेकेण स्वतः परतो वा स्वबुद्ध्या परतो न्यप्रमाणादिना वा बोधो आत्मसाक्षात्कारो नास्तीत्यर्थः ४४ ननु वेदः आत्मबोधे प्रमाणमस्तु प्रमा
णांतरसापेक्षमप्यस्त्वनुमानवत् अनुमानस्य प्रत्यक्षोपजीवकत्वादित्याकांक्षायामाह नापेक्षत इति नापेक्षते नाकांक्षति यत्स्वप्रमा
ण्यं प्रमाणमन्यत्प्रमाणांतरं तस्याप्यपेक्षा प्रमाणांतरेण नास्तीति ते अखिलानि मानानि सर्वप्रमाणानि परं पेक्षंते आकांक्षंति त
न्निगमानां वाक्यं प्रमाणभूतं ब्रह्मण्यतींद्रियावगतौ आत्मावगतौ बाह्येंद्रियाद्यविषये न स्वर्गावगतौ च मानं अतींद्रिये ब्रह्मावगमे वाक्यस्य स्वतःप्र
माणं नास्तीत्यर्थः ४५

ननु सत्यासत्ययोरुभयोरप्यारोपणमुभयविलक्षणवस्तुनिष्ठादित्याकांक्षायामाह यथारोपणमिति यदि द्वेधारोपणमथाप्युभयोः
सत्यासत्ययोस्तदा तद्व्यतिरिक्तस्योभयविलक्षणपदार्थस्य कस्यचित्कस्याप्यभावः अन्यः पदार्थो नास्तीत्यर्थः ननूभयविलक्षणं वस्त्व हृ
मस्ति तत्र कुतोऽध्यासो न भवतीत्याह आरोपणमिति शून्येऽवस्तुनि आरोपणं कस्यचिन्न संभवति यत्तस्माद् द्वैतसत्यताऽद्वैतवस्तु
नः सत्यताग्राह्यांगीकर्तव्येत्यर्थः ५३ एवंभूतेऽद्वैतवस्तुनि श्रुतिरेव प्रमाणमित्याह प्रत्यक्षेति प्रत्यक्षाद्यनवगतं प्रत्यक्षादिप्रमाणयोर

यथारोपणमुभयोस्तद्व्यतिरिक्तस्य कस्यचिदभावः आरोपणं न शून्ये तस्माद् द्वैतसत्यताग्राह्या ५३ ॥ प्रत्यक्षाद्यनवगतं श्रु
त्या प्रतिपादनीयमद्वैतं द्वैतं न प्रतिपाद्यं तत्स्वरूपमेव लोकसिद्धत्वात् ५४ ॥ अद्वैतं सुखरूपं दुःसहदुःखं सदा भवेद् द्वैतं यत्र
प्रयोजनं स्यात्प्रतिपादयति श्रुतिस्तदेवासौ ॥ ५५ ॥

10 नवबोध्यमेवंरूपमद्वैतं ब्रह्म श्रुत्यैव प्रतिपादनीयं तर्हि द्वैतमपि श्रुत्यैव प्रति
पादनीयमित्याकांक्षायामाह द्वैतमिति द्वैतं न प्रतिपाद्यं श्रुत्या किमिति तस्य द्वैतस्य स्वरूपमेव स्वभावतस्तु एव लोकसिद्धत्वाल्लोकैरेवावि
ष्कृतैः प्रतिपादितत्वादित्यर्थः ५४ ननु श्रुतिरद्वैतमेव प्रतिपादयति न द्वैतं किमित्याकांक्षायामाह अद्वैतमिति अद्वैतं सुखरूपम
द्वैतस्य सुखरूपत्वात्सर्वस्य प्राणिनः सुखमेवेष्टं न दुःखमिति द्वैतं तु दुःसहदुःखमसत्यं कष्टं सदा भवेत् निरंतरं भवति तस्माद्यत्र प्रयो
जनं स्यात् यत्रापेक्षा भवति तदेव प्रतिपादयति दर्शयति असौ श्रुतिस्तत्त्वमस्यादीनि वेदांतवाक्यानीत्यर्थः ॥ ६१ ॥ ६१ ५५ ॥ छ

सं. १०

वेदः प्रमाणमित्युक्तं तस्यांशद्वयं तत्कार्यं चेदांगीदर्शयति अंशद्वयवतीति अंशद्वयवति भागद्वययुक्ते निगमे वेदे एकांशः प्रथमं भागः द्वै-
तं साधयति भेदं प्रतिपादयति कर्तृकर्मफलादिरूपं अद्वैतमेव वस्तु ब्रह्मस्वरूपं सर्वभेदरहितमपरोंश उपनिषद्भागः प्रतिपादयति प्रसिद्धं
सर्वानुभवगोचरमिति वस्तुविशेषणं ५० तत्र द्वैताद्वैतयोः प्रमाणभूतवेदप्रतिपाद्यत्वात्कस्य सत्यत्वं कस्यासत्यत्वमित्याकांक्षायामाह अद्वै-
तमिति अद्वैतमेव सत्यं यदद्वैतं वस्तु ब्रह्मरूपं तदेव सत्यं तस्मिन्नद्वैते द्वैतं प्रपंचरूपमसत्यं मिथ्याभूतमध्यस्तमारोपितं तत्र दृ ॥ छ ॥ छ ॥

अंशद्वयवति निगमे साधयति द्वैतमेवैको ऽंशः अद्वैतमेव वस्तु प्रतिपादयति प्रसिद्धमपरोंशः ५० ॥ अद्वैतमेव सत्यं तस्मिन्द्वैतं
न सत्यमध्यस्तं रजतमिव शुक्तिकायां मृगतृष्णिकायामिवोदकस्फुरणं ५१ आरोपितं यदि स्याद्द्वैतं वस्त्ववस्तु निर्द्वैते युक्तं नैव तत
((ह्रासात्तस्येध्यासो भवसत्सानां ५२ ॥ छ ॥

ष्टांतः यथा शुक्तिकायां रजतं एवं मृगतृष्णिकायां मरीचिकायां चोदकस्फुरणमुदक
भानं तद्वदित्यर्थः ५१ ननु वैपरीत्यमेव कुतो न भवति द्वैते अद्वैतारोपः इत्याकांक्षायामाह आरोपितमिति आरोपितमध्यस्तं यदि चेद्द्वैतं व
स्तु सत्यस्वरूपं द्वैते ऽसत्ये तदा तस्मिन्न्ते युक्तं न स्यात् तत्त्वभावात्तस्य ऽध्यासो वस्तुस्वरूपे आरोपो ऽसत्यानां भवति तस्य वस्तुरूपत्वा
प
दित्यर्थः ॥ ५२

ईदृशं तेपि साधितमर्थं निराकरोति जीवत्वमपि जीवस्वरूपमपि ईदृशं तथाऽयो ईदृशं तत्र बहुविधसुखदुःखलक्षणोपेतमनेकप्रकारसुखदुःखयुतमेतादृशं साधनशक्त्या कृत्वागतमिव नष्टमिव प्रतिभासेत परंतु विनाशं न प्राप्नोति न नश्यतीत्यर्थः ६० ईदृशं जीजीवस्य स्वतो जीवत्वेऽङ्गीक्रियमाणे दोषमाह तस्मादिति तस्मात्कारणाद्यदि चेत् जीवः स्वतः स्वभावतः जीवरूपेण स्यात् सततं निरंतरं स जीवः जीव एव स्यात्तस्य स्वरूपबोधेन जीवत्वनिवृत्तिर्न स्यादित्यर्थः एवमनेन प्रकारेण यदि चेत् परमात्मा स्यात्तर्हि परमात्मैवायमिति भवेद्युक्तं स्वमतं स्वरूपतोऽयं परमात्मैवानुपाधिवशाज्जीवत्वं प्राप्तस्तनुपाधित्यये परमात्मस्वरूप एवेत्यर्थः ६१ ईदृशं जीवस्वरूप

जीवत्वमपि तथेदं बहुविधसुखदुःखलक्षणोपेतं गतमिव साधनशक्त्या प्रतिभासेत नैव नाशितं विनाशं ६० तस्मात्स्वतो यदि स्याज्जीवः सततं स एव जीवः स्यात् एवं यदि परमात्मा परमात्मैवायमिति भवेद्युक्तं ॥ ६१ ॥ यदि वा परेण साम्यं जीवश्चेद्भजति साधनबलेन कालेन तदपि कियता नश्यत्येवेति निश्चितं सकलैः ॥ ६२ ॥ तस्मात्संसारं स्वकीयं मोहं मोहात्मकं च संसारं स्वज्ञाने नजहित्वा तरीः स्वयमेव शिष्यते नान्यत् ॥ ६३ ॥ ६९

तापत्तं निराकरोति यदि वेति यदि वा पक्षांतरेण साम्यं जीवः साधनबलेन उपासनादिबलेन परेण परमात्मना साम्यं समरूपतां भजति प्राप्नोति चेत्तदपि तादृग्रूप्यमपि कियता कालेन साधनशक्तिनाशावधिकालेन नश्यत्येवेति सकलैः प्राज्ञैर्निश्चितं निर्णीतं परकृतकं तन्नश्यत्येवेत्यर्थः ६२ ईदृशं नीयथोक्तलक्षणगुरुपूर्वकवेदांतश्रवणादिना ब्रह्मस्वरूपतासंपादनीयेत्याह तस्मादिति तस्मात्संसारं निर्धारं स्वकीयं स्वसंबंधिनं मोहमविद्याख्यं मोहात्मकं मोहस्वरूपं संसारं च जीवत्वलक्षणं स्वज्ञानेन स्वात्मावबोधेन जहित्वा तुरीकसम्पूर्णां सर्ववस्तुस्थितमद्वैतात्मरूपः स्वयमेव स्वरूपेणैवावशिष्यते नान्यत्तदतिरिक्तं किंचिन्नावशिष्यते सर्वप्रपंचविलापनेन ब्रह्मस्वरूपमेवावतिष्ठतीत्यर्थः ६३ ॥

इदानीमद्वैतानंदरूपस्य ब्रह्मणः जीवत्वमपि स्वाभाविकमित्याशंकते निगमगिरा प्रतिपाद्यमिति निगमगिरोपनिषद्वाक्यैः प्रति
पाद्यं सिद्धं इति तं यदानंदरूपमानंदघनमद्वैतं वस्तु ब्रह्म तस्य जीवत्वं स्वाभाविकं स्वरूपं जीवस्वरूपता पि स्वत एवेति केचन पंडितम
न्या वदंति अविद्याहतत्वादित्यर्थः ५६ इदानीं यदाशंकितं ब्रह्मणः स्वत एव जीवत्वमिति तन्निराक्रियते स्वाभाविकमिति तस्य ब्र
ह्मणः विशदविज्ञप्तेः निर्मलज्ञानस्वरूपस्य जीवत्वं यदि स्वाभाविकं स्वत एव स्यात् चेत्तर्हि तज्जीवत्वं जीवस्वभावत्वं सहस्रदपिक
ल्पाचिदपि विनाशं निराकरणमद्वैतं बोधेन न गच्छेत् न प्राप्नुयात् स्वाभाविकधर्मस्य दुर्निवार्यत्वात् यथा वन्हेरुष्णप्रकाशस्वभावत्व
निगमगिरा प्रतिपाद्यं वस्तु यदानंदरूपं अद्वैतं स्वाभाविकं स्वरूपं जीवत्वं तस्य केचन ब्रुवंते ५६॥ स्वाभाविकं यदि स्यात् जीव
त्वं तस्य विशदविज्ञप्तेः सहस्रदपि न तद्विनाशं गच्छेत् उष्णप्रकाशवद्वन्हेः ५७ यद्वद्योरसविद्धं काचनतां याति तद्वदेवासौ जी
वः साधनशक्त्या परतां याती ति केचिदिच्छंति ५८॥ तदिदं भवति न युक्तं गतवति तस्मिन् चिरेण रसवीर्ये प्रतिपद्यते प्र

((णा यद्वै मोवर्णोऽप्ययः समाहृद५९॥

मनिवार्यत्वदित्यर्थः ५७ नीरक्तमपि ब्रह्मणः जीवत्वं स्वत एवेति पक्षे पि जीवः साधनैर्ब्रह्मोपासनादिभिस्तद्रूपत्वं प्राप्नोतीत्याशंका
का तेय द्वदिति यद्वद्यथा अयः लोहधातुः रसविद्धं रसलेपेन विद्रुसेन पारदेन वौषधिरसेन वानुप्रविष्टं कांचनतां याति सुवर्णरूपं भवति तद्व
दसौ जीवः साधनशक्त्या कृत्वा परतां याति प्राप्नोतीति केचिदिच्छंति केचिदाशंकते सिद्धांतात् नभिन्नत्वात् ५८ इदानीं जीवः साधन
शक्त्या परतां याती त्यपि मतं निराकरोति तदिदं मतं युक्तं युक्तिसिद्धं न भवति कुतः प्रथमतः दृष्टांत एव प्रतिपादितं दूषयति रसवीर्येण रसप्र
क्त्या कांचनतां गतं लोहं चिरेण चिरकालेन रसवीर्येऽपगतवति नष्टे सति हेमोवर्णः सुवर्णरूपत्वं अयः समाहृदः अय सिगतः॥६०॥ न

प्रमाणाद्वा प्रतिपद्यते प्राप्नोति पुनरपि अयः स्वरूपतां प्राप्नोतीत्यर्थः ५९

प्रकरणभेदेन ज्ञानस्य कर्माङ्गत्वं निराकृतं इदानीमधिकारिविषयभेदेनापि तन्न संभवतीत्याह अधिकारिविषयभेदादिति अधिकारी
विषयभेदौ अधिकारी च विषयश्चाधिकारिविषयौ तयोर्भेदो ययोस्तौ कर्मज्ञानात्मकौ कर्मज्ञानप्रतिपादकौ तु भौ काण्डौ कोर्थः एवं काण्ड
द्वयात्मकः कर्मकाण्डज्ञानकाण्डात्मकः कर्मकाण्डज्ञानकाण्डयोश्चाधिकारिविषयौ भिन्नभिन्नाविसर्थः एवं सति अधिकारिविषयभेदे
सति कथमनयोर्ज्ञानकर्मणोरङ्गाङ्गित्वमङ्गप्रधानभावत्वं घटते न घटते इत्यर्थः ६८ इदानीं यथा ज्ञानं कर्मप्रकरणनिष्ठं न भवति तथा
कर्मापि ज्ञानप्रकरणनिष्ठं न भवतीत्याह ज्ञानमिति यथा ज्ञानमात्मज्ञानं कर्मणि कर्मप्रकरणे न स्यात् न संभवति तथैव कर्मापि ज्ञाने ज्ञा

च अधिकारिविषयभेदे कर्मज्ञानात्मकावुभौ काण्डौ एवं सति कथमनयोरङ्गाङ्गित्वं परस्परं घटते। ६८ ज्ञानं कर्मणि न स्यान्न ज्ञाने क
र्मेदमपि तथा न स्यात् कथमनयोरुभयोस्तपनतमोवत्समुच्चयो घटते ६९ तस्मान्मोहनिवृत्तौ ज्ञानं न सहायमन्यदर्थयते यद्वत
स घनतरतिमिरमकरपरिध्वंसनेहस्रांशुः ७० ज्ञानं तदेवममलं साक्षी विश्वस्य भवति परमात्मा संबध्यते न धर्मैः साक्षी तैरेव स
च्चिदानंदः ७१॥

12

न प्रकरणे न स्यान्न संभवेत् एवं सति कथमनयोरुभयोर्ज्ञानकर्मणोस्तपनतमोवत् सूर्यान्धकारयोरिव समुच्चयः सहावस्थानलक्षणः एकाधि
करण्यं न घटते न संभवति विरुद्धत्वादित्यर्थः ६९ इदानीमविद्यानिवृत्तौ ज्ञानमन्यत्सहायं नापेक्षत इत्याह तस्मादिति तस्माद्यतः सहायानपेक्ष
मतः कारणात् ज्ञानं मोहनिवृत्तावविद्यानिवृत्तौ वन्यत्कर्मादिकं सहायं सहकारिणं नार्थयते नापेक्षते अनन्यसहायत्वमेव दृष्टान्तेन प्रतिपादय
ति यद्वदिति यद्वद्यथा घनतरतिमिरमकरैः प्रध्वंसने निबिडान्धकारदूरीकरणे सहस्रांशुः सूर्यः सहायं नापेक्षते तद्वदित्यर्थः ७० इदानीं
ज्ञानफलार्थमाह ज्ञानं तदेवमिति ज्ञानं ज्ञानशब्दवाच्यं तदेव सर्वानुभवसिद्धमेव यः विश्वस्य साक्षी जगतः ज्ञाता परमात्मा ब्रह्मस्वरूपः स
ज्ञानं भवति स ज्ञानरूप आत्मा साक्षी तैर्धर्मैरविद्यापरिकल्पितैर्न संबध्यते अविद्यापरिकल्पितत्वात् अत एव सच्चिदानन्दः सच्चिदानन्दरू

ननु प्रपंचविलापने न ब्रह्मस्वरूपमेवावशिष्यते इत्यत्र किं प्रमाणमित्यत्राह सत्यज्ञानानंदमिति सत्यज्ञानानंदं सत्यज्ञानानंदस्वरूपं प्रक्र-
न्तं तत्पदं परमात्मस्वरूपमद्वैतं द्वैतरहितमेवं लक्षणं निखिलाः समस्ता उपनिषच्छ्रुतयः समस्ताभिः स्मृतिभिः सहिता बोधयंति प्रतिपादयंति ६४
इदानीमेकत्वबोधकानामुपनिषद्वाक्यानां अवांतरवाक्यमप्यस्मिन्नर्थे मिथीयंत इत्याह एकत्वेति एकत्वबोधकानामद्वैतप्रतिपादकानां
निगमवाक्यानामुपनिषद्वाक्यानां शेषभूतान्यवशिष्टान्यंगभूतानि वाक्यांतराण्येकत्वप्रतिपादकान्यभिधीयंते स्मनुच्यंते सर्ववेदेन सूत्र-
कारादिभिर्वा अवांतरवाक्यानि तु सृष्टिस्थितिप्रलयसंयमनप्रवेशादि पंचविधार्थवादरूपाणि यतो वा इमानि भूतानि जायंत इत्यादीनि ६५

सत्यज्ञानानंदं प्रकृतं परमात्मस्वरूपमद्वैतं अवबोधयंति निखिलाः श्रुतयः स्मृतिभिः समस्ताभिः ६४ एकत्वबोधकानां निखिलानां
निगमवाक्यजालानां वाक्यांतराणि सकलान्यभिधीयंते स्म शेषभूतानि ६५ यस्मिन्निहि खलु दृश्यते इति मिखद्यपांति कर्तृत्वादीनि ज्ञा-
नं विरहितमेदं कथमेतद्भवति तत्त्वमस्यादेः ६६ कर्मप्रकरणानिष्टं ज्ञानं कर्मांगमिष्यते प्राज्ञैः भिन्नप्रकरणभाजः कर्मांगत्वं कथं भवेत्तस्य ६७

इदानीं सर्वोपाधिरहितमद्वैतात्मज्ञानं तत्त्वमस्यादिवाक्येभ्यः कथं भवतीत्याशंकते यस्मिन्निति यस्मिन्नु ज्ञाने मिहि खलु दृश्यते इति सत्सु इदं पं मा-
मेस्तीति कर्तृत्वादीनि कर्तृत्वभोक्तृत्वादीनि निमिखद्यपांति न स्फुरंति एतादृशमेतत् ज्ञानं विरहितमेदं विगतमेदं तत्त्वमस्यादेः तत्त्वमस्यादिवाक्ये-
भ्यः कथं संभवति न संभवति बोधकत्वाभावादित्यर्थः ६६ इदानीं पूर्वार्धेन ज्ञानस्य कर्मांगत्वमाशंक्योत्तरार्धेन निराकरोति कर्मप्रकरणानिष्टमि-
ति कर्मप्रकरणानिष्टं कर्मप्रकरणास्थितं ज्ञानं कर्मांगमग्निहोत्रायंगमिष्यते प्रतिपाद्यते प्राज्ञैर्मीमांसकपंडितैः तन्न संभवति प्रकरणभेदादि-
त्याह भिन्नप्रकरणभाज इति भिन्नप्रकरणभाजः भिन्नप्रकरणस्य सज्ञतेः ज्ञानस्य कर्मांगत्वं कथं भवेन्न संभवति भिन्नप्रकरणत्वादित्यर्थः॥ ६७

एवमद्वैतात्मब्रह्मज्ञानेसतिसर्वंज्ञातंभवतीत्याह तस्मिन्नितिप्रतिपादितेऽद्वैतेब्रह्मणिविदितेज्ञातेसतिविश्वंसर्वोऽपिप्रपंचः अशेषमनव
शेषितंविदितंभवेत् तत्रदृष्टांतः कारणमृद्घटादिकंप्रतिकारणीभूतायांमृत्तिकायांविदितायांघटकरकाद्याययथावगम्यंतेघटकरकादी
निकार्याणिविदितानिमृन्मयत्वेनज्ञातानिभवंतितद्वदित्यर्थः ७५ इदानींप्रतिपादितंकारणत्वेनयद्ब्रह्मतदेवसर्वस्यकारणंनान्यदित्या
हतदिदमितितदिदंब्रह्मणकंकारणंकार्यभूतस्यप्रपंचस्यकिलसराणांकारणंविगतविशेषंविशेषरहितंविशुद्धचिद्रूपंचैतन्यस्वभावंत
स्मात्सदेकरूपात्सत्त्वनानात्वरहितात्मायोपहितत्वादशेषंसर्वमिदमिदमाकारेणानुभूयमानविश्वंजगद्भूतजातमभ्रवादिपरिक

तस्मिन्ब्रह्मणिविदितेविश्वमशेषंभवेदिदंविदितंकारणमृदिविदितायांघटकरकाद्याययथावगम्यंते ७५ तदिदंकारणमेकंवि
गतविशेषंविशुद्धचिद्रूपंतस्मात्सदेकरूपान्मायोपहितादभूदशेषमिदंविश्वं ७६ कारणमसदितिकेचित्कथयंत्यसतोभवे
न्नकारणता अंकुरजननीशक्तिःसतिखलुबीजेसमीक्ष्यतेसकलैः ७७ कारणमसदितिकथयन्वंध्यापुत्रेणनिर्वहेत्कार्यं
किंचमृगतृष्णिकांभःपीत्वोदन्यांमहीयसींशमयेत् ७८॥

13 स्थितप्रधानादिकारणंनभवतीत्यर्थः ७६ इदानीमसत्कारणवादिपक्षंनिराकरोति कारणमितिकारणमसदितिकेचित्केचिद्वादिनःकथ
यंतितन्नसंभवति असतःकारणतानभवेत् तत्रदृष्टांतः अंकुरजननी अंकुरोत्पादिकाशक्तिःबीजेसत्येवसद्रूपेबीजेविद्यमानेसकलैर्लो
कैःसमीक्ष्यतेऽवलोक्यते असतिबीजेनावलोक्यतइत्यर्थः ७७ पुनरप्यसत्कारणवादंनिराकरोति कारणमिति कारणंप्रपंचस्यासदितिक
थयन्वादीवंध्यापुत्रेणकारणीभूतेनकार्यंसंततुसस्यादिरूपंनिर्वहेत्साधयेत् किंचमृगतृष्णिकांभःपीत्वोदन्यांतृषांमहीयसींमहतींशमये
त्नाशयेत्वंध्यापुत्रमरीचिकोदकानामसत्त्वान्नकार्याभावइत्यर्थः ७८ ॥ ६९ ॥ राम:१३

ननुज्ञानरूपस्यात्मनः कल्पितैर्धर्मैः संबध्यते चेत्तस्य साक्षित्वं केन संबंधेनेत्यत आह रज्ज्वादेरिति यथा रज्ज्वादेर्वस्तुन उरगाद्यैरुरगमाला
धाराद्यैः संबंधः तद्रूपसंबंधः तथात्मनः कर्तृत्वादिधर्मैः संबंधः तद्रूपसंबंधः आत्मनोऽद्वितीयत्वात् न त्वन्यः संबंधः संयोगः समवायो वा कु
तो न भवतीत्यत आह सततमिति सततं निरंतरं अयमात्माऽसंगः सर्वसंबंधरहितः तस्यासंगत्वे श्रुतिं प्रमाणयति श्रुतिरसंगश्रुतिरस्य
मसंगत्वलक्षणमर्थं साधयति प्रतिपादयति एष नेति नेत्यात्मेत्युपक्रम्य अगृह्यो न हि गृह्यते अशीर्यो न हि शीर्यते असंगो न हि सज्यते सितो न व्य
थते न रिष्यत्यभयं वै जनक प्राप्तोऽसीति बृहदारण्यकीश्रुतिः ७२ इदानीं ब्रह्मस्वरूपातिरिक्तं धर्मादिवस्तुजातं किमपि नास्ति येन संबंधाय

रज्ज्वादेरुरगाद्यैः संबंधस्तस्य तद्रूपसंबंधः सततमसंगोयमिति श्रुतिरप्यममर्थमेव साधयति ७२॥ कर्तृत्वकर्म च यस्य स्फुरति ब्र
ह्मैव तत्त्वजानाति यस्य न कर्तृत्वं न कर्म स्फुरतरमयमेवेदितुं तं मते ७३ कर्तृत्वादिकमेतन्मायापाश्च्यात्प्रतिपाद्यते निखिलं इति
((केचिदाहुरेषां भ्रांतिर्ब्रह्मातिरेकेणानामत् ७४ ॥ ७२

येत्यास्यादित्याह कर्तृ इति कर्तृत्वाम कर्तृत्वं च कारो वार्थः। कर्म च कर्मरूपं वा यस्य स्फुरति
स ब्रह्मैव कर्तृकर्मस्फुरणरूपेण तत् कर्तृकर्म ब्रह्म न जानाति तस्यावस्तुत्वादित्य[illegible]र्थः यस्य ब्रह्मणः कर्तृकर्म किमपि न नास्ति स ब्रह्म ॥
रूप अयमात्मैव स्फुरतरवेदितुं ज्ञातुं क्रमते नुपक्रमते ७३ ननु तर्हि कर्तृत्वप्रसयस्य का गतिरित्यत आह कर्तृत्वादिकमिति कर्तृत्वादिकं
कर्तृत्वभोक्तृत्वादिकमेतन्मायाध्यासनिमित्तिपाद्यते निखिलं समग्रं इति केचिदाहुः केचिद्वादिन एवमाहुस्तेषामेषा कल्पनारूपा भ्रांतिः
कुतः ब्रह्मातिरेकेण ब्रह्मव्यतिरिक्ततया ऽन्यत्किमपि नास्ति एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किंचनेत्यादिश्रुतेः ७४ ॥

इदानीं विशुद्धाधिकारिणां सर्वं ब्रह्मैवेति वेदः बोधयतीत्याह परिपक्वमानसानामिति परिपक्वमानसानां श्रवणमननादिभिः।
स्थितमतानां पुरुषवराणां नुत्कृष्टाधिकारिणां पुरातनैः प्राचीनजन्मसंपादितैः सुकृतैः पुण्यमरैर्हेतुभिर्ब्रह्मात्मभावनापुक्ता
नामयं वेदनुपनिषद्भागात्मकः सकलमेतज्जगत ब्रह्मैवेति प्रतिबोधयति भूयः बहुधा सर्वं खल्विदं ब्रह्मेति श्रुतेः आत्मातिरि
क्तं सर्वं किंचिदपि नास्तीत्यर्थः ८२ ननु अद्वयं ब्रह्मैव भातीति वेदान्ताः प्रतिपादयंति तर्हि सर्वेषां न प्राकृतो नावभासतइत्यत
आह अनवगतकांचनानामिति अनवगतकांचनानां सुवर्णज्ञानवतां हैमभूषणे सुवर्णपरिणामे भूषणेऽलंकारे भूषणधी

वेदं सर्वं जगदित्ति

परिपक्वमानसानां पुरुषवराणां पुरातनैः सुकृतैः ब्रह्मैव [illegible] भूयः प्रबोधयत्येवः ८२ वेदं सर्वं जग[illegible]दिति अन
प वगतकांचनानां भूषणधीरेव भूषणे हेमे एवमविवेकभाजां जगति जनानां नतात्विकी धिषणा ८३॥ अहमालंब
नसिद्धं कस्यपरोक्षं भवेदिदं ब्रह्म तदपि विचारविहीनैरपरोक्षयितुं न शक्यते मुग्धैः ८४ ॥ ६९ ॥ ६९ ॥ ६९ ॥ ६९

24

रेवालंकारबुद्धिरेव यथा सुवर्णे नतिरिक्तेपि सुवर्णबुद्धिर्नास्ति एवं जगत्यस्मिंल्लोके विवेकभाजां तात्विकबुद्धिरहितानां जना
नां मनुष्याणां तात्विकी ब्रह्मैवेदं सर्वमेवं रूपा धिषणा न भवतीत्यर्थः ८३ इदानीमेवमद्वयं ब्रह्मापरोक्षमेवसरविवेकिभिः प
रोक्षमेव प्रतीयतेत्याह अहमालंबनसिद्धमिति अहमालंबनसिद्धमहमस्म्यहं जानामीत्येवं प्रकारेणानुभवस्तेन सिद्धं प्रसिद्धं
सर्वमनुष्येषु कस्य पुरुषस्येदं ब्रह्मापरोक्षं भवेन्न कस्यापि तदप्येवमपरोक्षमपि श्रुतिविचारविहीनैः श्रुत्यर्थपरिशीलनविधुरैः मु
ग्धैरागृहीतैर्ब्रह्मापरोक्षयितुं साक्षा

श्रीहस्तामलकस्तोत्रटीका प. १३ ८

राम:१५

इदानीमसत्कारणवादः श्रुतियुक्तिभ्यामनुपपन्न इत्याह यस्मादिति यस्माच्छ्रुतियुक्त्युपपन्नत्वात् सोयं पूर्वोक्त असत्कारणवादः शा

म स्त्रयुक्तिभ्यां न संभवति न घटते शास्त्रं सदेव सोम्येदमग्र आसीदिति युक्तिः वंध्यापुत्रादिभ्यो कार्यानुत्पत्तिः तस्माद्यस्मादसत्कारणवादेन

घटते ऽतः सदेव सत्स्वरूपमेव तत्त्वं ब्रह्म सर्वेषां जगतां कारणं हेतुरूपं जंतोर्भवति ७९ ननु प्रपंचकारणं सद्रूपं ब्रह्मेत्युक्ते ऽद्वैतताहानिः स्या

दित्याशंक्याह जगदाकारतयेति जगदाकारतयापि प्रपंचरूपेणापि ब्रह्मैव प्रथते प्रसिद्धिं गच्छति गुरुशिष्यविग्रहतयापि गुरुशि

दि ष्यरूपेणापि तथा ब्रह्माद्याकारतयापि हिरण्यगर्भादिदेवतारूपेणापीदृक्परमं तत्त्वं ब्रह्मस्वरूपं मतिभाति तदाकारतया ब्रह्मैव विवर्तरूपे त

ग

यस्मान्न सोयमसतो वादः संभवति शास्त्रयुक्तिभ्यां तस्मात्सदेव तत्त्वं सर्वेषां कारणं भवति जंतोः ७९ ॥ जगदाकारतयापि

प्रथते गुरुशिष्यविग्रहतयापि ब्रह्माद्याकारतयापि भातीदृक्परमं तत्त्वं ८० सत्त्वं जगदिति मानं संसृतये स्यादपक्वचित्तानां

(तस्मादसत्समेतं निखिलं प्रतिपादयंति निगमांताः ८१

ण भासत इत्यर्थः ८० इदानीं ब्रह्मैव जगद्विवर्तरूपेणाभासते जगत्तद्भिन्नं यो

स्त्रीसुक्तं तत्र केषांचिदविवेकिनां जगत्सत्त्वं ब्रह्मणः भिन्नमिति मानं जन्ममरणपरंपरायै भवतीत्याह सत्त्वमिति सत्त्वं जगदिति मा

नं जगदपि ब्रह्मणः पृथक् सद्रूपमिति ज्ञानमपक्वचित्तानामद्वैतभावनारहितानां गु रूणां विधुराणां संसृतये जन्ममरणपरंपरा कु

यै व स्याद्भवति यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते ऽथ तस्य भयं भवतीति श्रुतेः तस्मादपकारणत्वहेतोः एतत्तदिदं निखिलं

जगदसद्ब्रह्मणो ऽभिन्नमिति निगमांताः उपनिषदः प्रतिपादयंति बोधयंति ॥ ८१ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ

५२

२५ इदानीमहं प्रत्यग्रूपस्यात्मैवार्थो नान्य इत्याह नाक्षादिति तस्मात्कारणात्सर्वशरीरे अहमहमित्येवाहमहं प्रकारान्तरस्वरूपस्तानेवाभासते स्फुटः प्र
कारविशुद्धः केवलः तस्मादहंप्रत्ययस्य बुद्धेरेव मुख्योऽर्थः भवतीति गोशब्दवदित्यर्थः ८८ इदानीं बुद्धेरेवाहंकारस्य मुख्यः पश्यतीति पद्युक्तं तदेवाहंशब्देन साध
यति गोशब्दादिति गोशब्दात् गौरस्य यः शब्दः सास्नादिमत्तद्व्यक्तिर्गोत्वसामान्यरूपयाऽमुख्योऽर्थस्तदपि गोत्वमपि अस्य शब्दस्य पाश्चात्त्यं बाधकः
प्रतीयते गवाकृतिर्लक्षितेन तदेवमेवाहमर्थः मुख्यः परमात्मा ऽध्यात्माहंकारोऽहं प्रत्ययस्यामुख्योऽभवतीत्यर्थः ८९ इदानीमात्माहंकारे

तस्मात्त्वशरीरे ऽहमहमित्येवं भासते स्फुटः यः प्रत्यग्विशुद्धस्तस्यैव भवति मुख्योऽर्थः ८८ गोशब्दादिवद्गौणं त
दपि व्यक्तिः प्रतीयतेऽर्थतयाऽस्य ह्यमर्थ्यः परमात्मा तदध्यस्तात्मा भवत्यहंकारः ८९ इत्थं लादिकमयसः पावकसंगेन भा
सते यद्वत् तद्वच्चेतनसंगादहमिति प्रतिभाति कायेतादीनि ९० देहेन्द्रियादिरहितं व्यतिरिक्तं विमलमतुलम
द्वैतं अहमर्थमिति विदित्वा तदतिरिक्तेन कल्पयेत्किंचित् ९१

यि अहंप्रत्ययार्थो भवतीत्येतच्चाहंकारेऽपि कर्तृत्वादिधर्मारोपोऽपि भवतीत्याह इत्थं लादिकमिति इत्थं लादिकं दाहकत्वं यथा अयसः लोह
स्य पावकसंयोगेन भवति एवमिहापि चेतनसंगात्तत्सन्निधानादहमित्यहंकारेऽपि कर्तृत्वादीनि कर्तृत्वभोक्तृत्वादिकं प्र
तिभाति भासते ध्यानादिरित्यर्थः ९० तस्मादन्यैव गाहमर्थ एवं निश्चितं विभावयेन्नान्यदित्याह देहेन्द्रियादिरहितं व्यतिरिक्तमिति देहेन्द्रिया रि
दिरहितं व्यतिरिक्तं पृथक् सकलविलक्षणं निर्मलमविद्यालेशरहितमतुलं सादृश्यरहितमद्वैतं तद्वस्तितमहमर्थमहंप्रत्ययगोचरं ब्रह्मैवाह
मिति विदित्वा ज्ञात्वा तदतिरिक्तं व्यतिरिक्तं किंचिद्वस्तुजातं न कल्पयेन्न भावयेदित्यर्थः ९१ सू° २५

इदानीं सर्वत्र तत्तेनैवेम्भवन्ति न हि लौकिको वा शास्त्रीयो वा व्यवहारः लोकानां कथं संभवतीत्यत आह अहमिति अहमिदमिति च मतिभ्यां अहंशब्देना
स्मत्प्रत्ययगोचरो विषयी इदंशब्देन युष्मत्प्रत्ययगोचरो विषयस्तदुभयात्मकेऽपि बुद्धिं नाभ्यामयं सर्वोऽपि लोकः सततं व्यवहरति स्वस्वव्यवहारं करोति
न च बुद्धिद्वयस्य विषयं विभजते उत्तरार्धेन प्रथमेति प्रथमाहमात्मिका बुद्धिः प्रतीचि प्रत्यगात्मनि निवसति चरमा द्वितीया वपुरिंद्रियादिका प्राग्वस्थूलदे ति
हादौ एवं विषयविपर्यासरेतरेतराध्यासेन सर्वोऽपि लोको व्यवहरति न पारोक्षेऽस्त्रभाष्येः हे अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहार इति २५
इदानीं बाह्येष्वेव स्थूलादौ अयाहंबुद्धिः साऽध्यासिकी त्याह वपुरिंद्रियादिविषयेति च पुरिंद्रियादिविषयायाः अहंबुद्धेरग्रहे भवति सा भ्रांतिमोहरूपाध्यासरूपा

अहमिदमिति च मतिभ्यां सततं व्यवहरति सर्वलोकोऽपि प्रथमा प्रतीचि चरमा निवसति वपुरिंद्रियादिका प्राच्यै २५ वपुरिंद्रिया
दिविषयायामहंबुद्धिर्भ्रमरूपा सा भ्रांतिः अनित्यबुद्धिरित्यध्यासलेन गम्यमानत्वात् २६ तस्मादशेषसाक्षी परमा
त्मैवाहमपरोक्षचित्तं अज उत्पत्तेर्वर्जितोऽपि मत्त्वबोधमुखमहंकारः २७

एवं बुद्धेः अध्यासत्वमुक्त्वा तत्र हेतुमाह अनित्यमिति अनित्यत्वबुद्धिः अन्यप्रकारे अन्याकारकं तानेव यथा रज्जुभूतशुक्तिकादौ रजतबुद्धिः अ
ध्यासो नाम अनित्यत्वबुद्धिरित्यध्यासभाष्ये अध्यासत्वेनाध्यासलक्षणत्वेन गम्यमानत्वादित्यर्थः २६ इदानीमहंबुद्धेरिदंबुद्धे
श्चात्मन्यध्यस्तत्वादात्मैवाहंबुद्धेरर्थ इत्याह तस्मादिति तस्माद्धेतोरहंकारपर्यन्तस्याध्यस्तत्वात् अशेषसाक्षी परमात्मैवाहमर्थः अहंप्रत्यय
स्यापरोक्षचित्तं घटने उत्पत्त्यादिवर्जितः अयं अहंकारः तत्संबंधात् तत्संबंधाभ्रमवति २७

इदानीमिदं मायामात्रं जगच्चित्रं कुत्र तिष्ठति केन चोन्मादितमित्याकांक्षायामाह आत्मन्यपेति आत्मन्यपेमले आत्मस्वरूपे मलरहिते अतिपटे
विस्तीर्णेऽपटे चास्मिन्निःशेषविविधं जगच्चित्रं नानारूपं जगत्स्वरूपं चित्रं चित्रसदृशमात्मनैव लिखितं स्वेच्छानुलिकया न त्वन्यैः इदं जगच्चित्रमात्म
नात्मन्यस्मिन्स्वयमेव लिखितं न स्वयमेवात्मैव पश्यन् स्वकेवलो केवलमेव लोकयित्वान्तरं हृष्टमुदमानन्दं परमात्मैव स्वयं प्रयाति प्राप्नो
ति यथा कश्चिल्लोके कोऽपि चित्रकारः पुरुषः स्वयमेव चित्रमुल्लिख्य स्वकरतलाघवं तत्र समग्रं पश्यन् स्वयमेव परमानन्दं प्राप्नोति तद्व
त्तथा चोक्तं योगिनीहृदये जगच्चित्रं समालिख्य स्वेच्छातूलिकयात्मनि स्वयमेव समालोक्य प्रीणाति भगवान् शिव इति ॥१५॥ इदानीमिद
मनुभवप्रदर्शनेन तत्त्वं बुद्धस्यैव भातीत्याह चिन्मात्रमिति चिन्मात्रं चैतन्यस्वरूपं स्वमलं विशुद्धमरूपमरूपमद्वयं द्वितीयरहितमानन्द

आत्मन्यपेमलेऽतिपटे विविधं जगच्चित्रमात्मना लिखितं स्वयमेवैकेवलमसौ पश्यन्प्रमुदं प्रयाति परमात्मा ॥१५॥
चिन्मात्रममलमरूपमद्वयमानन्दमनुभवारूढं बुद्धस्यैवास्ति न दृश्यमन्यत् किंचिदस्तीति निश्चयो विदुषां ॥१६॥ व्यवहार
स्य दर्शये विद्याविद्येति भेदपरिभाषा नात्यन्तं तत्त्वदृष्ट्या तत्त्वं बुद्धस्यैव नान्यदस्त्यस्मात् ॥१७॥

मानन्दस्वरूपमनुभवारूढमनुभवविषयमेतद्रूपं बुद्धस्यैवास्ति तिष्ठति न दृश्यं बुद्धादन्यत् किंचिदस्तीति विदुषां तत्त्वज्ञानां निश्चयः इति द्वै
तं न प्राचो नेव्यापि तिकाद्यैः कश्चिद्व्यवहारोऽपि तेन पश्यति यो धाम्न्यस्ति केशान् पश्यति चिद्ध्यानान् किंतु पश्यति मिथ्यैव द्विमोहे
तु विभाग इति ॥१६॥ ननु बुद्धस्यापीति कथं किमपि न भाति चेद्विद्याविद्यादिरूपेण विभागः कस्य कथमिति शंकायामाह व्यवहारस्येति व्य
वहारस्य दर्शये व्यवहारो व्यवहारः शास्त्रीयो लौकिकादिस्तत्संपादनार्थे विद्याविद्येति ज्ञानाज्ञानात्मिका महामहतीयं भाषा संज्ञा तत्त्व
दृष्ट्या बुद्धस्यात्मैकत्वनिष्ठा न दृश्या नास्त्येव तत्त्वयथार्थस्वरूपं बुद्धस्यैवास्त्यस्माद्बुद्धात् ज्ञातादन्यद्वस्त्वन्तरं नास्तीति नेह नानास्ति किंचनेत्या
दिश्रुतेः ॥१७॥

इदानीमात्मादेः प्रत्यगोचरत्वेन सर्वशरीरोपाधौ समत्वेन तथापि उपाधिभेदादात्मनोऽपि भेदेऽनुभववैचित्र्यं भवतीत्याह यद्वदिति पद्यद्वयात् सुख-
दुःखानां सुखदुःखप्रत्ययानाम् अवयवभेदात् हस्तपादाद्यङ्गभेदात् एकस्मिन्नेव देहे शरीरे भिन्नता प्रवृत्तिः हस्ते मम सुखं हस्ते मम दुःखं शिरसि मम सु-
खं शिरसि मम दुःखमित्यादिप्रकारेण तद्वत् यथा इह संसारे भेदे सत्यप्येषामात्मनामनुभववैचित्र्यं स्वपरसुखभयात्मकं भिन्नमभिन्नं भिन्नाभि-
न्नमित्याद्यनुभववैलक्षण्यं भवतीत्यर्थः ८२ इदानीमेवमनुभववैचित्र्यं प्रपञ्चात्मके भवति तस्य किं कारणं किंस्वरूपमित्यादितर्कजालेन कर्तव्यमा-
यामयत्वादित्याह किमिदमिति किमिदं प्रपञ्चजालं किं भवति अस्य स्वरूपं च किमिदं कथमभवत् अयं ज्ञानमनुष्यप्रपञ्चजालस्य को वा हेतुः किं कार-

यद्वत्सुखदुःखानामवयवभेदादनेकता देहे । तद्वदिह सत्यभेदेऽप्यनुभववैचित्र्यमात्मनामेषाम् ॥ ८२ ॥ किमिदं किमस्य
रूपं कथमभवदमुष्य को हेतुः । इति न कदापि विचिन्त्यं चिन्त्यं मायेति धीमता विश्वम् ॥ ८३ ॥ दन्तिनि दारुविकारे दारु तिरोभवति सो-
ऽपि तत्रैव । जगति तथा परमात्मा परमात्मन्यपि जगत्तिरोधत्ते ॥ ८४ ॥

णमित्यादि न कदापि चिन्त्यं न विचारणीयं धीमता ज्ञानिना किं तु मायैवेयं मायामात्रमिदमेवेदं विश्वं सर्वं प्रपञ्चजालमधिष्ठानमेव तद्रूपेणास्फु-
रति विवर्तरूपेत्यर्थः ८३ इदानीं दृष्टान्तेनाभेदं साधयन्नाह दन्तिनीति दन्तिनि गजे दारुविकारे काष्ठविकृते काष्ठरचिते दारु काष्ठं तिरोभवति
न दृश्यते भवति गजस्य रूपमेव भाति न दारुरूपं सोऽपि दन्त्यपि तत्रैव दारुण्येव तिरोभवति दारुरूपमेव भाति न गजस्य रूपं बालानां बुद्धिमतां च गज-
बुद्धिर्दारुबुद्धिश्चेति तथा जगति प्रपञ्चे परमात्मा तिरोभवत्यन्तर्हितो भवति जगत्स्वरूपमेव भाति नात्मरूपं तथा परमात्मन्यपि स्वात्मरूपेऽपि जग-
त्तिरोभवत्यात्मरूपमेव भाति न जगद्रूपमिति भावः ८४ ७

पिदम

कें

८ इदानीमेवमद्वैतवासनया प्रास्थितानां वृत्सनिष्ठानां तासां मूढत्वाद्विधर्मे जाते नास्तीत्याह किमितीति किं चिन्त्यमर्थे ज्ञाने चिन्त्यं विचारणी-
यं किं किमचिन्त्यं चिंतनीयमपि किं किमपि कथनीयं विधेयं किं किमप्यकथनीयं गोप्यमत्यंतरहस्यमपि किं किं चिन्त्यं कर्तव्यं किं किं-
मप्यकर्तव्यं सा नास्ति निखिलं मत्वे ब्रह्मेति विज्ञानतां तत्तामवतां विदुषां तत्त्वज्ञानोदये द्वैताग्रहाभावादपूर्णकामत्वादितिभा-
वः कामयमानो यः कामयमानो यो कामो निष्कामश्च आप्तकाम आत्मकाम इति श्रुतिश्रेयस्त्वर्थः ११ इदानीं तादृशानां तत्त्व-
ज्ञानिनां बंधमोक्षादिव्यवहारोपि नास्तीत्याह निखिलमिति निखिलं सर्वं दृश्यविशेषमध्यारोपितत्वाद्ब्रह्मज्ञानतो ब्रह्मरूपत्वेन दृष्ट-

किमप्य कथनीयं

किं चिंत्यं किमचिंत्यं किं कथनीयं किं कृत्यं किमकृत्यं निखिलं तत्त्वमिति ज्ञानवतां विदुषां ११ निखिलं दृश्यवि-

शेषं दृश्यरूपत्वेन पश्यतां विदुषां बंधो नापि न मुक्तिर्नैव परमात्मत्वं नापि जीवत्वं १२ अत्र सदृष्टान्तं चिंतितानां चा

मव्याहृतनगरनिजदेशानां प्रमाणं परमसीम्नां निगमानामिदमेव निखिलनिगमानां ३

२७

दृश्यविशेषं ब्रह्मरूपत्वेन पश्यतामेव लोकपतां विदुषां ज्ञानिनां न बंधः नापि मुक्तिर्नैव परमात्मत्वमीश्वरत्वं न वा जीवत्वं जीवस्वरूपत्वं वा
किमप्यस्तीति किमपि नास्तीत्यर्थः १२ इदानीं पत्रप्रतिपादितं ब्रह्मात्मैकत्वज्ञानं तदेव सर्वोपनिषदां तात्पर्ये प्रमाणभूतमि-
त्याह अत्र सदृशेति अत्र सदृष्टान्तं चिंतितानां पुनः पुनर्विचारितानां भावनागोचरीकृतानां अव्याहतनगरनिजदेशानां अव्याह-
तो बोधितो निजदेशः स्वात्मस्वरूपं यैस्तेषां निगमानामुपनिषद्भागानां परमसीम्नां सकलप्रमाणावधिभूतानामिदमेव पद्रुक्-
मात्मैकत्वं तदेव प्रमाणं निगमं प्रतिज्ञादिपंचपदैः प्रतिपादितं स्यादेष्यनस्माज्जपेति वचनं निगमनं सर्ववेदांतसिद्धांतोपमेव-
त्यर्थः ३ ॥

तत्त्व ६०

रत्वं नीब्रह्मणोऽन्यदपि वस्त्वंतरमस्तीति मते पि अस्तित्वरूपेण ब्रह्मैवोच्यते वादिभिरित्याह अस्तीति अस्त्यन्यद्ब्रह्मणोऽन्यद्वस्त्वंतरमस्तीति मते चेद्वादिनां तदपि वस्त्वंतरमप्यस्तित्वरूपेण ब्रह्मैव भवति अस्तित्वं ब्रह्मणो मन्नतास्तीत्यर्थः तर्ह्यस्तित्वव्यतिरिक्तं नास्तित्वरूपेणान्यद्वस्त्वंतरमस्तीति चेत्तत्राह व्यतिरेकमिति व्यतिरिक्तं भिन्नमस्तितायाः अस्तित्वरूपान्नास्तितया नास्तित्वं शशशृंगवत्स्वरूपमेव न त्वास्तित्वमित्यर्थ न वृक्तं वादिनामेवमतमित्यर्थः ९८ ननु ब्रह्मातिरिक्तं किमपि न भाति चेद्विदुषां शरीरव्यवहारः कथं संभवतीत्याशंक्याह तत्त्वावबोधशक्त्येति तत्त्वावबोधशक्त्या मेकत्वज्ञानशक्त्या स्थिरतया विशेषणादिरहितत्वेन बाधितापि सा मायापि बाधत्वेन तिरस्कृता

अस्त्यन्यदिति मंतव्ये तदपि ब्रह्मैव तदस्तिताहृदयं व्यतिरिक्तमस्तितायां नास्तितयास्वरूपमेव तत्सिद्धं ९८ तत्त्वावबोध

शक्त्या स्थिरतया बाधितापि सा माया आदेहपातमेषा भासान्यत्वात्मापि निजं विदुषां ९९ एष विशेषो विदुषां प्र

पंचतोपि प्रपंचसंसारं प्रत्यगात्मनो न किंचिन्मरूपयुः सकलनिगमनिर्णीतानां १००

पि सा लोकप्रसिद्धशरीरव्यवहाररूपा माया आदेहपातमेवं तावदिति एषां विदुषां ब्रह्मनिष्ठानामाभाति मिथ्यात्वेनाभासते आत्मापि निजः स्वस्वरूपेणानंदरूपेण आत्मत्वेनाभाति प्रकाशते ९९ ननु शरीरपातपर्यंतं विदुषामविदुषां च सप्रपंचभाने चेद्विदुषां को विशेष इत्यत आह एष इति एष अयं विशेषो विदुषां ज्ञानिनां प्रपंचतोपि च भासमानाद्द्वैतदृष्टेर्ज्ञोपि संतं प्रपंचमेतं संसारमापि केवलव्यवहारमात्मनः प्रत्यगात्मनो भिन्नं किंचित्किमपि नैष रूपयुः सकलनिगमनिर्णीतास्तेषामुपनिषद्वाक्यैर्निर्णीता स्वात्मनः सकाशादन्यच्च भावयंतीत्यर्थः १००

प

इंद्रियेति इंद्रियसुखविमुखेविषयानित्यसुखरहितः निजसुखबोधानुभूतिभरितः आत्मसुखानुभवपरिपूर्णः इति मतिहरनरः एवंप्रकार
आत्मारम्याकाररूपामनिर्वृत्तिस्याद्धरनर अप्राप्यअप्यचभावेनरमुखितचित्तः भावाः पदार्थाविषयास्तेभ्योविषयादिसुखेतरं भिन्नसुख
तेनसुखितसुखरूपतांगतंचित्तंयस्य ज्ञानेनसोहमेव अहेपदेपदेवस्वात्मकंयोजनीयं ८ ईशोरमितिईशः परमात्मा सामर्थ्यवानीश्वरस्तस्मिन्क
र्तुमकर्तुं अन्यथाकर्तुंसमर्थोनामपिर्देषोद्वेषाउपगरहितः रागद्वेषादिसंबंधरहितः ईशगतिविषयमतीनां आत्मस्वरूपावलोकनेह
योपोविषयतास्मिन्मतिर्येषांतेषांमध्येईश्वरपुरुषार्थसाधनपरअभिलषितोपोचरमपुरुषार्थः तत्साधनेतत्परः अहमेव ९ उदयोत्

इंद्रियसुखविमुखोहं निजसुखबोधानुभूतिभरितोहं इतिमतिहरनरोहं भावेनरमुखितचित्तोहं ८ ईशोहमीश्वरतरोहं ईशोहं
षानुषंगरहितोहं ईशगतिविषयमतीनां ईश्वरपुरुषार्थसाधनपरोहं ९ उदयोहमेवजगतामुपनिषदुद्यानविहारोहं उद्वे
लशोकसागरवाडवदहनवाहनाञ्चिरहं ५ ऊर्जस्वलनिजविभवेहर्षमधस्तिर्यग्ग्वानोहं ऊहापोहविचारैः रहितोहं नव
न्यगोपमानोहं १०

उदयमिति जगतामुदयः उत्पत्तिस्थितिलयमनामुदयः प्रकाशः उपनिषदुद्यानविहारः उपनिषदएवउद्यानंवनंतस्मिन्विहारस्तत्पर्य
पर्यालनपरः उद्वेलशोकसागरवाडवदहनवाहनाः उद्वेलोहृष्टिंगतो यः शोकसागरः कामानलाप्लिः अंतर्जलधिः तस्यशोषणेवडवा
नलायितः उद्वानलरूपेणजप्त्वहमेव ९ ऊर्जस्वलनिजविभवे एतितेऊर्जस्वलाअन्यैनतेजोमयपापेनिजविभवाभवविभूतयस्ताभिःऊर्ध्वमु
परिअधः अधोभागे तिर्यक् सर्वदिक्षुकोणेषु अनुवान्याप्रवान् ऊहापोहविचारैः ऊहसर्वअपोहसहितनिरूपणं तन्नामाविचाराः तैरहिती
ऊहजवनश्वमीलनरं वप्रातीपमानगोपमानोहमेव १० ॥ ॥

रदानीमवशिष्टेन ग्रंथेन प्रत्यभिहितेनैदंशिकेनात्मस्वरूपतांनीतः शिष्यः गुरुचरणसरोजेभिवंद्य स्वानुभवात्सर्वात्मकत्वं प्रमुदितमनावा
चाविष्कारेत्याह इत्थमिति इत्थमितिबोधितः इत्युक्तप्रकारेणोपदिष्टो गुरुणाचार्येण शिष्योधिकारी हृष्यन् प्रमुदितमनाः तद्गुरुपदयोश्च
रणसरोजयोः प्रणम्य नमस्कारं कृत्वा स्वानुभवसिद्धमर्थं साक्षात्कृतं ब्रह्मस्वरूपतात्मना स्वयमेवांतर्बुद्धौ विचारयामास मननगोच
रीकृतवानित्यर्थः ४ इदानीं स्वस्य सर्वात्मकत्वं प्रकटयति अज्ञोऽहमिति अज्ञो जन्मरहितः अज्ञानवाभवरविहृतिरहितः प्राज्ञ इत्यर्थः
प्रत्यगात्मबोधः प्रतिव्यक्तिप्रकाशकज्ञानरूपः [illegible]ः परमानंदमयः आनंदप्रचुरः परमशिवः सकलनिदानभूतः

त्यं इत्थं बोधितः सद्गुरुणा शिष्यो हृष्यन्प्रणम्य तत्पदयोः स्वानुभवसिद्धमर्थं स्वयमेवांतर्विचारयामास ४

अज्ञोऽहमल्पोऽहं प्राज्ञोऽहं प्रत्यगात्मबोधोऽहं परमानंदमयोऽहं परमशिवोऽहं भवाब्धिपरिमुक्तः ५

आप्तोऽहमात्मभाजामात्मानंदानुभूतिरसिकोऽहं आबालगोपमखिलैरहमित्यनुभूयमानमहिमाहं ६

श्री शिवमयोऽहं भवाब्धिमुक्तः इत्यादि प्रत्येकं योजनीयं अज्ञोऽहमल्पोऽहमित्यादि ५ आप्तोऽहमिति अहमात्मभाजामात्मज्ञानवतां मध्ये आ
प्तोऽस्मि सपत्नोऽस्मि अहमात्मानंदानुभूतिरसिकः ब्रह्मानंदानुभवरसज्ञः आबालगोपं बालगोपालमपरीकृत्य सर्वाबालगोपमखिलैर्जन
ैरहमित्यनुभूयमानमहिमाहं मित्यनुभूयमानोऽमहत्त्वं यस्य तादृशोऽहमेव सर्वात्ममयः ६ ॥

ओजोहमिति ओषधीनामोजः सर्वासामोषधीनां तेजः ओं तप्तो तापमानमुखनः आप्तनापामरपेराण्यापृनिभूवनाग्निपेनस्तोहमोंका
रसारसोऽहमसहात्मसुखोमोदमजन्मगोऽहं ॐकारणावसारसं कमलेन स्वादुह्यस मन्य आमोदः बोधलक्षणः तेनमत्तो विस्मृतोऽहं हृदि
रहमेव ११४ ओषधमिति अस्य भानोपापहपाणामौषधमुन्मूलनकरमहमेव ओं पाधिकजालरहितोऽहं नुपाधिह्नतम विघो
प्याहितं पञ्जाले पुपंचलमाततदूरितं अहमेव ओं हापोतिशापः हानाति शापः विनिविधचतुर्वर्गपरः मनोकल्पित नविविधवहु प्र
कारकोपोवचतुर्वर्गः धर्मादिपुरुषार्थसमुहस्तस्यप्रनगणालेपादनेनस्मरत्नसाधनपरोऽहमेवेत्यर्थः ११५ अकुशमिति महत्तपामन

ओजोहमौषधीनामोतप्तोतापमानमुखनोऽहं ओंकारसारसोऽहमसहात्मसुखोमोदमजन्मगोऽहं ११४ ओषध
महमस्मभानामोपाधिकजालरहितोऽहं ओं हापोतिशापोऽहं विनाविविधचतुर्वर्गनरतापरोऽहं ११५ अकुशमह
मखिलानांमहत्तपामजवारणोद्गणां अवरमिवविमलोऽहं शंबुरिपुरिवजानविहृतिरहितोऽहं ११६ आत्मवि
कल्पमतीनाम सकलदुपदेशगम्यमानोऽहं अस्थिरसुखविमुखोऽहं सुस्थिरसुखवोधसंपदुचितोऽहं ११७

वारणोद्गणाम् महमंकुशः महत्तपावपंमहोन्नतिमहत्तेनोत्कृष्टत्वेन मत्तामहोन्मनापेवारणोद्गणां गजधौरेयाः तेषामखिलानाम
मत्तानामंकुशः तेषां मदापहारकः अवरमिवाकाशमिवविमलोऽहं शंवरिपुरिवशिवरवजातापाविहृतिविकारस्तेन रहित अहमेव
११६ आत्मविकल्पमतीनामिति आत्मनि आत्मविषये विकल्पमतीनां नानात्मास्तीत्यहंभावामिलानध्यामिवेतिविकल्पबुद्धीनाम्
सकलदुपदेशगम्यमानः अस्वलन्नचलं निश्चितोपदेशेनगम्यमानोबुध्यमानः अस्थिरसुखविमुखः अस्थिरं चलं पाद्दिपप्रमुखेन दु

ऋषिरिति ऋषिरहं ऋषिस्तु तीतानागतवर्तमानार्थद्रष्टा ऋषिगणाः सप्तर्षिसमुद्रः सृष्टिः सर्गः सृज्यमानं सकलमनेनैव ऋद्धिमद्भिः वृद्धिर्लाभाव न पुः सर्वकामावाप्तिः न पुष्टिः पदीप्तिः सर्वकामावाप्तिलक्षणोपोहेपलस्फेहिपि पुष्पाप्रसर अहमेव १११ एकरतिएकः सर्वभेदरहितः एतादृग्मोहशमेन स्मकारमेव मिथ्यामित्यादिप्रस्फुरितमनसः कल्पनाजालं तद्भेदरहित अहमेव अनीहेफलाप्तावृद्धिरहितः पष्टव्यः पतेषु पजीनीपः अंतः सुकृतानु

प

स ऋषिरहं महर्षिगणोऽहं सृष्टिरहं सृज्यमानमहमेव ऋद्धिरहं वृद्धिरहं तृप्तिरहं न पुष्टिर्दीप्तिरहं १११ एकोऽहमेव न द्वितीयोऽहमेव
मिति स्फुरितभेदरहितोऽहं पष्टव्योऽहमनीहोऽहं तः सुकृतानुभूतिरहितोऽहं ११२ एकावभासकोऽहं वाक्परिज्ञानपावनम
तीनां एशमहमेव तत्त्वैर्नेशः तमःप्रापमोहमितिरोऽहं ११३

भूतिरहित अंतः अंग्रव्यरोपाप्तुहृतानुभूतिः उपपात्वाहमेव लभ्यपातद्रहित अहमेव ११२ एकावभासकइति एकावभासकः एकोर कत्वतस्यावभासकः प्रकाशकः वाक्परिज्ञानपावनमतीनाम हावाक्योपपरिज्ञानं ब्रह्मस्वभावबोधस्तेन पावनाविशुद्धमतिर्येषां ते षां एशमहमेवन तत्वस्यापनेश तमः प्रापमोहमितिहिः नियामं बोधिपन्नमघनाधकारस्तन्याप न्नसदृशो यो मोह अज्ञानं तस्यापच्छेदकमि
हिः महत्वमानुरहमेव ११३

हृद्सिंधौ निगूढं ज्ञानमुख्यां ह्लादमोदमानमिति । हृद्यंबेव हृदयमेव सिंधुः महोदधिः तस्मिन्निगूढं गुप्तं ज्ञानं मुख्यं तस्मात् ज्ञानोपशमाह्लाद
तेन मोदमानं प्रमुदितः स्थूलपदविहितमतीनां स्थूलेनाम स्वरूपार्थं मत्यथार्थकल्पनेन तत्केवलवान्यालक्षणाद्यस्मिन्वाक्ये पदा
र्थस्यार्थकल्पनं तस्य पदस्य तत्र विहितानि वेशितामतिर्येषां तेषां स्थूलो ज्ञानः शांतिमार्गगम्यः दुःखकीर्तिरहितो योमार्गः संप्रदायस्ते
न गम्यः प्राप्योऽहमेव ॥ १२२ ॥ जलजाग्ननादिगोचरपंचमहाभूतमूलभूतमिति जलज्ञाग्नानां वृक्षस्य स्नानादिषेषां तेषां वृक्षा विस्तृमहेशानो गो
चरीभूताः आकाशादिपंचमहाभूतानां मूलभूतः पूर्वेऽहस्मानेजगद्दानेदक्षरेजयति लोकत्रये स्थानेदक्षः सुखदाता जन्मजरारोगद

हृद्‌सिंधुनिगूढज्ञानसुखाह्लादमोदमानोऽहं स्थूलपदविहितमतीनां स्थूलोऽहं शांतिमार्गगम्योऽहं ॥ १२२ ॥ जलजाग्नना
दिगोचरपंचमहाभूतमूलभूतोऽहं जगद्दानेदक्षोऽहं जन्मजरारोगमरणरहितोऽहं ॥ १२३ ॥ मेरुतिरुंहकृतिनिर्जितनरहरिज
मुखविविधनादश्मेऽहं कृतिघटितात्मवेदनदीपपरिस्फुरितहृदयभवनोऽहं ॥ १२४ ॥ ज्ञानमहं ज्ञेयमहं ज्ञातारहं ज्ञा
नसाधनगणोऽहं ज्ञानाज्ञानविनाशनमस्तित्वमात्रमेवाहं ॥ १२५ ॥

हितः षड्भावविकाररहितोऽहमेव ॥ २३ ॥ मेरुतिरुंहकृतिनिर्जितनरहरिजमुखविविधनादश्मेऽहमिति मेरुतिः क्रौंचनामा गिरिः स्कंदः कृति
रतो विरुद्ध निर्जितनभूधराध्वनिः हरिः करीराध्वनिः एतेरणमुखाः मुख्याः एतादृशा ये विविधाः नादश्मेघः ध्वनिविकारस्त
स्वरूपः कृतिघटितात्मवेदनदीपपरिस्फुरितहृदयभवनः कृतितिभिप्रघटितः ज्ञतः आत्मवेदनदीपः आत्मज्ञानलक्षणो दीपः
प्रकाशस्तेन परिस्फुरितं प्रकाशितं हृदयभवनं हृदयपुंडरीकं येन आहमेव ॥ १२४ ॥ ज्ञानमिति ज्ञानेपराधीनग्राहकाहृतिः ते पक्षा नावि
षयः ज्ञाताहमिति ग्राविषयं ज्ञानवान् ज्ञानसाधनगणादिरूपसमूहः ज्ञानाज्ञानविनाशनमस्ति तत्त्वज्ञानत्वादि चिंतपरहितम

करुणारसभरितोऽहमिति करुणारसभरितः कृपामृतपूर्णः कवलितकमलासनादिलोकः कवलितः ग्रस्तः कमलासनलोकः ब्रह्मलोकः आ
अहमेव कलुषाहंकारविलसनाः मलिनाहंकृतिरहितः कल्मषमुक्तो पलेशरहितः कल्मषं पापं सुकृतं पुण्यं तदुभयोपलेपः संसर्गस्तद्दूषित
अहमेव ११८ खानामिति खानामिंद्रियाणामगोचरोऽविषयः खातीतो नश्वरो दूपातीत आकाशादिभूतातीतो बालपुष्पभवग आकाशपुष्प
भवग आकाशपुष्पप्रायो यो भवः संसारस्तस्मिन् गमनागमनरहितो मनोऽहं अनीहः फलाशारहितो गंतव्यः प्राप्यः गत्यागतिरहितपूर्ण
बोधतृप्ति विनाशविहीनो यो पूर्णबोधः आत्मस्वरूपलक्षणः अहमेव ११९ घनतरमोहतिमिरप्रकरप्रध्वंसनभानुनिकरः तिघनतरे

करुणारसभरितोऽहं कवलितकमलासनादिलोकोऽहं कलुषाहंकारविलसनोऽहं कल्मषसुकृतोपलेशरहितोऽहं ११८ खाना-
मगोचरोऽहं खातीतोऽहं खपुष्पभवगोऽहं खलजनदुर्गमदोऽहं खंडज्ञानोपनोदनपरोऽहं ११९ गलितद्वैतकपोतं देहोऽभ-
वद्विलमूलहृत्पोऽहं गमनागमनोऽहं मनोऽहं गमनागतिरहितपूर्णबोधोऽहं १२० घनतरमोहतिमिरप्रकरप्रध्वंसनभानुनि-
करोऽहं घटिकावासररजनीसंवत्सरयुगकल्पकालभेदोऽहं १२० चराचरात्मकोऽहं चतुरमतिश्लाघ्यसुचरितोऽहं च-
पलजनदुर्गमोऽहं चलभवजलधिपारदोऽहं १२१

निविडतरो यो मोहः स एव तिमिरमंधकारस्तस्य यो प्रकरो व्याप्तिस्तस्य प्रध्वंसनकरः नाशकरः सहस्रकिरणसमः घटिकावासररजः
नीसंवत्सरयुगकल्पकालभेदो घटिकादिकल्पांतोपः कालभेदः सोऽहमेव १२० चराचरात्मक इति चराचरात्मकः स्थावरजंगमात्म-
कः चतुरमतिश्लाघ्यचरितः निपुणबुद्धिभिः श्लाघ्यचरितः तत्स्थावरगाः चपलजनदुर्गमः चपलजनविषयावपलापेजना तैर्दुर्गमो दुरापः
चलभवजलधिपारदः अपि संसारवारिधेर्यो पारः तत्प्रदः ब्रह्मलक्षणः स अहमेव १२१

२१ पराजीवभेदबाधकपरमार्थज्ञानसुद्धचित्तइतिपदच्छेदः जीवः शरीरी तयोर्यो भेदस्तस्य बाधकं यत्परमार्थज्ञानं परमार्थज्ञानेबुद्धेकल्लतानेते
न शुद्धचित्तः प्रकृतिरिति मूलप्रकृतिरविकृतिर्महदाद्या प्रकृतिविकृतयः सप्तेति सांख्येविकृतिर्महदादिसपूर्वकं भागधेयानां
भाग्यानां परिणतिः परिणामरूप अहमेव १२० फणाधरभूधरवारणादिग्रहविधजनप्रपंचसार इति फणाधराः शेषनागाः पृथिवीग्रहास्ते
विधजनो पञ्चप्रपंचस्य सारः भालतलोहितलोचनपावकपरिभूतपंचबाणः अहमेवास्मि १२१ बद्ध इति अहं बद्धो न भवामि
पाशान् षड्केनबद्धो न घृणालज्जाभयं शंकाजुगुप्साचेति पंचमी कुलं शीलं च जातिरष्टौ पाशाः प्रकीर्तिताः पाशबद्ध

पराजीवभेदबाधकपरमार्थज्ञानसुद्धचित्तोहं प्रकृतिरहं विकृतिरहं परिणतिरहमस्मि भागधेयानां १२० फणाधर
भूधरवारणातिग्रहविधजनप्रपंचसारोहं भालतलोहितलोचनपावकपरिभूतपंचबाणोहं १२१ बद्धो भवामि
नाहं बंधान्मुक्तस्तथापि नैवाहं बाध्यो भवामि नाहं बोधोहं नैव बोधकोनाहं १२२ भक्तिरहं भजनमहं मुक्तिर
हं मुक्तिमुक्तिरहमेव भूतानां सनोहं भजनभवद्भव्यमलभजनोहं १२३

स्मृतो जीवः पाशमुक्तः सदाशिव इति तेभ्यो मुक्तः पाशाः अतएव बंधान्मुक्तोपि न भवामि बाध्यः तत्वसाक्षात्कारेण न भवामि बोधो
न भवामि हन्ति ज्ञानं न बोधकज्ञोपि न भवाम्यहं १२२ भक्तिरिति भक्तिः भगवद्रूपाहृतिः तदुक्तं भक्तिरसायनेद्गतस्य भगवद्
मोहादेवाहं कर्तागतः सर्वे रोमन्तसोहृत्तिः भक्तिरित्यभिधीयते इति भजनमर्चनादिभिरुपासनं मुक्तिर्बुद्धानंदावाप्तिरविद्या
निवृत्तिलक्षणा मुक्तिमुक्तिर्मुक्तिबोधनप्रकारः भूतानुशासनः सर्वेषां भूतानां शिक्षकः भूतभव्यभवन्मूलभूतः ज्ञानजाप

21

ल॰
२१

नत्वातीतपदइति नत्वातीतपदः नत्वानिचतुर्विंशतितत्त्वेभ्योऽतीतपदः तदुक्तिस्वरूपः तदेतत्तत्त्वमस्मिन्नित्वांतरे अतमसीतियोनतमध्ये
योभावः अभिप्रायस्तदुक्तिः नामसदुरधिगमः नामसातमोहनपक्षेदुरधिगमोदुःप्राप्यः तत्त्वपदबोधबोध्यहृदयः तत्त्वपदयोर्यो बोध
ऐक्यात्मलक्षणोलानं तेनतो बोध्यं बोधनीयं हृदयमंतःकरणोपलक्षस्वरूपमेव १२६ देवतदेत्यनिशाचरमानवतिपेउ. महीधरादिरितिदे
वतदेत्यनिशाचरमानवतिपेउ. महीधरादिः प्रसिद्धानामेतेषामादिः देहेद्विपरहितस्तद्भिन्नः दशिताप्रवीदिदिग्विभागः सर्वेऽदिग्विभागत्व

नत्वातीतपदोऽहं नतदेतत्त्वमस्मीतिभावरहितोऽहं नामसदुरधिगमोऽहं तत्त्वपदबोधबो[illegible]हृदयोऽहं १२६ देवतदेत्यनिशाच
रमानवतिपेउ. महीधरादिरहदेहेद्विपरहितोऽहं दशिताप्रवीदिदिग्विभागोऽहं १२७ धर्माधर्ममयोऽहं धर्माधर्मादिद्वंद्वधरहि
तोऽहं धार्मिकजनसुलभोऽहं धम्योऽहं धातुरादिभूतोऽहं १२८ नामादिविरहितोऽहं नरकस्वर्गापवर्गरहितोऽहं नादान्तरवेदितो
ऽहं नानाविधजनितविलासगमसारोऽहं १२९ ॥ श्रीरामचंद्रार्पणमस्तु

स्वरूपोऽहमेव १२७ धर्माधर्ममयइति धर्माधर्ममयोमयः स्वधर्माधर्मादिद्वंद्वरहितः धर्माधर्मादिमयद्वंद्वविलक्षणः धार्मिकजनसुलभो धार्मि
काः स्वधर्मशीलास्तेषां सुलभः धम्योऽहं धातुरादिभूतो धातुः ब्रह्मणः आदिभूतः कारणमहमेव १२८ नामादिविरहित इति नामा
दिरहितः अभिधानादिरहितः नरकस्वर्गापवर्गरहितः निषिद्धकाम्यनिष्कामादिकर्मभावप्राप्तिबोधगतिरहितः नादान्तरवेदितः स्वनादस्त
सा नादान्तर्भित्वेन योगिभिर्ज्ञातः नानाविधजनितविलासगमसारः नानाबहुप्रकारं यथा [illegible] विलासः [illegible] सारोऽहमेव
हमेव १२९ ॥ श्रीरामचंद्रार्पणमस्तु ७

२२ शमदमविरहितमनसामिति शमदमादिसाधनविरहितमनसां पुरुषाणां शास्त्रार्थैरपि अनेकशास्त्रार्थगहनैरपि अगम्यमानो ऽप्राप्यः वि
दुषां शास्त्रज्ञानिनां शास्त्राणामनेकं लौकिकं नानाविधसंशयगणाः छिन्नः अनेकप्रकारकोपः संशयगणाः संदेहसमूहो हमेव १३९
षड्गुणविरहित इति षड्गुणविरहित आत्मनाम्यादि शरीरधर्मरहितः षड्गुणाः रहितः मधुरादिगुणाः षड्गुणरहितः अहिनरहितो हेसमानि
ष्टरहितः षड्कोशविरहितः पितृजकोशत्रयं मातृजकोशत्रयं पञ्चद्विरहितः पितृमातामपि तात्पर्यान्तषट्कोशं जापते वपुः स्नापवान्ये
नि प्रज्ञावजापते पितृनालपालयत्रास शोतितमितिमात नत्रभवंति हीति शिवगीतापामुक्तकोशषट्कं षड्भिः स्तनलजालरहितः ष

शमदमविरहितमनसां पा स्त्रशास्त्रैरप्यगम्यमानो हे शरणामहमेव विदुषां शकलीकृतविविधसंशयगणो हे १३९ षड्गुण
विरहितो हे षड्गुणरहितो हमहितर रहितो हे षट्कोशविरहितो हे षट्त्रिंशत्तत्वजालरहितो हे १४० संवित्सुखात्मको हे
समाधिसंकल्पकल्पवृक्षो हे संसारविरहितो हे साक्षात्कारो हे मोक्षविधायो हे १४१ हत्यमहं कथमहेहे पोपादेपभाव
अन्यो हे हरिरहमस्मि हरो हे विधिरहमेव चिकारणे षा १४२

हिं शान्तलाभिशेवागमभूतपंचके प्रातापंचके शद्विमाणिचतुर्दशमहान्कालः प्रधानेमायाविद्यापुरुषः विंदुनादः शक्तिशिवः शां
ता शान्तातीतानां इति १४० संवित्सुखात्मकश्चिन्मेविसुखात्मकः ज्ञानसुखमयः समाधिसंकल्पकल्पवृक्षः समाधिस्थसंकल्प
स्थतपो कल्पवृक्षः संसारविरहितः संसारातीतः आत्मविधायाः साक्षात्कारः बुद्धविधायाः साक्षात्कृ भव १४१ हत्यमितिहय
हविर्दु मेदेवतायाहं कथं पितृणामहेदूमं हे पोपादेपभावशाल्वः हेयमात्मनुपादेयपाह्यं नन्तुभपभावमन्यः हरिः विष्णुः हरः शि
वः विधिर्ब्रह्मा एतेषां त्रयाणां कारणमहमेव १४२ ॥ ॥ एम० २२

मान्य इति मान्यः पूज्यः महतां मान्यानामपि मे इमतीनाममाननीयः अनतीनामसंभावनीयः मदरागमानमोहितमानसदुर्वासनादुरापः मदादिदोषैर्मोहितं यन्मानसं तस्य या दुर्वासना तया दुरापो दुःप्राप्योऽहमेव १३४ यजनयजमानयाजकयागमय इति यजनं तमन्त्रक हविःप्रक्षेपणादिक्रिया यजमानो यज्ञकर्ता याजका ऋत्विजः यागो देवतोद्देशेनाहवनीयपुरोडाशादिप्रदानं तन्मयस्तद्रूप स्वर्थः यमादिरहितः अष्टाङ्गसाधनरहितः इदं दुःप्रयमवरणायप्रणवसमरूढो यावन्निरूपः इत्यादिगोशास्त्ररूपोऽहमेव १३५ इत्येतिरेसा जगादूरगानस्य विधानं कर्तव्यतातस्य शिक्षा तस्या यो वीक्षितलीलावलोक तस्य महिमा अनिदिवसविरामस्फुरदनुभूतिप्रमा

मान्योऽहमस्मि महतां मदमतीनाममाननीयोऽहं मदरागमानमोहितमानसदुर्वासनादुरापोऽहं १३४ यजनयजमानयाजक
यागमयोऽहं यमादिरहितोऽहं दुःप्रयमवरणाय प्रणवसमरूढो यावन्निरूपोऽहं १३५ इत्यविधानशिक्षावीक्षितलीलावलोक
महिमाऽहं अनिदिवसविरामस्फुरदनुभूतिप्रमाणसिद्धोऽहं १३६ लाभालाभमयोऽहं लाभालाभकोऽहं लयादिरहितोऽहं ला
भालाभमयोऽहं लक्ष्यानामलभ्यमानोऽहं १३७ वर्णाश्रमरहितोऽहं वर्णमयोऽहं वैराग्यगम्योऽहं वाचामगोचरोऽहं वचसामविषय

णसिद्धः अनिदिवसमविरामो यथा स्यात्तथा स्फुरन्ती या अनुभूतिस्तद्रूपप्रमाणं तेन सिद्धोऽहमेव १३६ लाभालाभमय इति लभ्यं लाभः स्नो भवमयः लाभकः लब्धागम्योर्थः लयादिरहितः लयविक्षेपकषायरहितः लाभालाभमय उभयरूपः लक्ष्यानां प्राप्तुमशक्तानां पक्षे लभ्यमानः अप्राप्यमानोऽहमेव १३७ वर्णाश्रमरहित इति वर्णाश्रमोभयरहितः वर्णमयः मातृकामयः वैराग्यगम्यः वैरा ग्यगम्यः वाचामगोचरः पराहीनामविषयः वचसां वाक्यानामविषयो वेदैश्च निर्विशेषः अविषयतया प्रतिष्ठोऽहमेव १३८

२३ हिमकरकरसारसंदोह इति हिमकरस्य चंद्रस्य किरणानां यः सारो रसः तज्जन्यद्रवस्तस्य संदोहो निकरः कांक्षितवरदानकल्पविशेषाः स्वेष्टवरदानेक
ल्पाः समर्थास्ते च ते विशेषाः विशिष्टाः एतादृशाः श्रीगुरुचरणकटाक्षाः गुरुचरणयोः कृपाकटाक्षाः शिशिराः शीतलाश्छिन्नसंतापं त्रिविधतापं
शमयंति दूरीकुर्वंति आनंदयंतीत्यर्थः १४७ कवलितं चंचलचेतरूपं कवलितो ग्रसितो मनोरूपश्चंचलरूपो भेको येन स गुरुतरो यो मोहः मंडूको
भेकस्तेन जातमपरितोषाशये तोषासंतुष्टा यस्ताः शोकश्चिन्मयी चैतन्यरूपा भुजगी हृदयगुहायां चिरतरं चिरकालं येनेसप्ता भवति एतदुक्तं भवति चेतोवृ
त्तिलये हृदयपुंडरीके स्वात्मस्वरूपप्रकाशो भवति अपवादश्चेतेति परं साम धीमत्सुषुम्णायां हृदि संवीपाधिलये सति केवला चितिरेव मुख्याऽस्मिका

हिमकरकरसारसंदोहः कांक्षितवरदानकल्पविशेषाः श्रीगुरुचरणकटाक्षाः शिशिराः शमयंति चित्तसंतापं १४७
कवलितचंचलचेतोगुरुतरमोहभेकजातमपारितोषाशये हृदयगुहायां चिरतरमेकैव चिन्मयी भुजगी १४८ मयि सुखबो
धपयोधौ महति ब्रह्मांडबुद्बुदसहस्रं मायाविशेषशालिनि भूत्वा भूत्वा तिरोधत्ते गुरुरूपेण नावा प्राक्तनभाग्यप्रवृद्धमा
रुतया दुःसहदुःखतरंगः संसारसागरस्तीर्णः १५०

त्ति हृतो भवतीत्यर्थः १४८ मयीति मय्यधिष्ठानभूते सुखबोधपयोधौ सुखस्वरूपो यो बोधः स एव पयोधिस्तस्मिन् पयोधौ समुद्रे महति व्यापके
ब्रह्मांडबुद्बुदसहस्रं ब्रह्मांडान्येव बुद्बुदास्तेषां सहस्रमनेकानि बुद्बुदानीत्यर्थः मायाविशेषशालिनि मायैव विशेषस्तेन शालि
नि स्थितो भावमानं भूत्वा भूत्वा तिरोधत्ते भूत्वा भूत्वोत्पद्योत्पद्य तिरोधत्ते नहि तं भवति १४९ गुरुरूपेणेति गुरुरूपेण गुरुस्वरूपा या ता
या नावा नौका प्राक्तनभाग्यप्रवृद्धमारुतया प्राक्तनं जन्मांतरार्जितं यन्महत्पुण्यं पुण्यफलं भाग्यं तदेव प्रवृद्धमारुतोऽनुकूलवायुः स यस्यास्तीति तया २३
दुःसहदुःखतरंगः दुःसहान्यसह्यानि यानि दुःखानि तान्येव तरंगा ऊर्मयो यस्मिन्स दुःसहदुःखतरंगः एतादृशः संसारसागरस्तीर्णो मयेत्य

मालिनकलुषमयमिति मालिनकलुषमयः मालिनकलुषमयः मालिनं योगे कलुषं पापमेतत् तत्स्वरूपं तन्मयः भ्रमितभवलोके ए
जालहृदयहरीहृतसंसारकष्टजालो मे कारणं भ्रान्ताधारस्थितिः अकारणं भकारान्तवर्णगुणः विविधअवतारमूलनानाप्रकारलोका
त्रैलोक्यलौकिकौ पापअवतारस्तस्य मूलं कारणमहमेव १५३ बुद्धिरिति राधिबुद्धिरहं जनैः किं विविधप्रकारहृपोऽहमिति भावः। किं किं
प्रपोऽजनं अमाहिकरये राज्ञा ये समहिहृपेणाहं रेदयराचरविश्वमहमेव सर्वविप्रपंचारमेवत्त्वं नरामावाने नरूपहृष्टानेः सीकरफेनतरंगाभि
धारपराजानखलुवस्तु नियच्यासीकरादीनां समुद्रात् राशिरं न द्विमर्थं १५४ शरणमिति शरणांप्रणां जननी मम न हि न भवति पिता पि

मालिनकलुषमयोऽहं भ्रमितभवलोकजालहृदयोऽहं भ्रान्ताधारस्थितिविविधअवतारमूलमहमेव १५३ बुद्धिः किमेभिरहं जनैरह
मेवेदं चराचरविश्वं सीकरफेनतरंगाः सिन्धोरपराणि न खलु वस्तूनि १५४ शरणं न हि मम जननी न पिता न सुता न सोदरा न्येपरं मं
शरणमिदमेव चरणं मम मूर्ध्नि दैशिकन्यस्तं १५५ आलिंदैशिकचरणं निरवधिरानन्दो भक्तोकरणो आनतिं किमपितदुर्जं किं
मतः परमेतिजन्मसाफल्यं १५६

म

शरणमिति न सुताः पुत्राः अपि न सोदरा भ्रातरोऽपि न अन्ये संबंधिनोऽपि मम शरणं न रक्षतो पयोपायनं भवन्ति न हि किं शरणमित्याह परमिति परम
मिति परमपुत्रः शरणां शरणं मम मूर्ध्नि मस्तके दैशिकन्यस्तं श्रीगुरुभिर्न्यस्तं स्थापितं चरणं परपदमेव शरणं नान्यदिति अर्थः १५५ आ
लम्बीति आलिंगिति दैशिकचरणं श्रीगुरुचरणाम्बुजरूपं मूर्ध्नि निरवधिर्निःसीमानन्दो भक्तो श्रीगुरुचरणमोक्षितोऽपि लोकानेकरणानां हसा
मे अपचनदुर्जं किं श्रीगुरुभिरुपदिष्टे ज्ञानेहृदयेनआसाहरणोऽर्थः किमस्मात् अतः परं जन्मसाफल्यं सफलं किं जन्मनः इदमेव फलपदं अं १५६

२५ सन्नीति सन्निविद्यमानेन तमसि मोहरूपेण अज्ञानरूपे अन्धकारे विम्बप्रपञ्चं संवेष्टितं गहनमेवानन्तदेवेन मवेद् दृष्टमिदं मलिनं समस्तं उदितनवति
बोधभानो नु उदये प्राप्ते ज्ञानार्के किमपि न पश्यामि किमपि किंचिदपि नावलोकयामीति इदं किं चित्रमद्भुतमित्यर्थः १५१ नाहमिति अहं
देवान्तमामि न नमस्करोमि पोटेवानन्तो न्यासि चमत्कारिसेवते देवान्तमेव ते नन्दनुनन्दने न रोपि ध्यानं वेधुर्यं कमेन न करोमि तस्मै सर्वो
त्मभूताय पयन्तं पुष्पवन्नवन्तं मन्त्रं नमो नमः न्यासस्य रणे पोषितः १५२ इतीति इति पद्यो क्रमात् बोधलाभं स्वात्मतत्त्वं प्राप्य मुहुः पुनः पुनर
नुचिन्त्य मननगोचरीकृत्य मोदमानेनानन्दावस्थां प्राप्तेनाधिकारिणा जीवन्मुक्तेन पुरश्चरणं कर्मणा नेपुरश्चरणं मीव सानन्देहावसाने परं कै

सति तमसि मोहरूपे विश्वप्रपञ्चे लुप्ते नदि त्यक्ति लुम्पति नवनि बोधभानो किमपि न पश्यामि किंचिदपि चित्रं १५१ नाहं नमामि दे
वान्तनीन्य ... न सेवते देवं न तर्पयकरोमि विधानं तस्मै पतनेन नमो नमो मह्यं १५२
इत्यात्मबोधलाभं मुहुरनुचिन्त्य मोदमानेन प्राप्य कर्म पुरश्चरणं परं प्राप्यते स्पर्शके वल्यं १५३ मोहान्धकारहरणे संसारे हलसागरे
नरत्वाप्तानुसिरपूर्णमेव अकरणमहन्तरं सितामुक्तिं १५४ अज्ञानान्धविहितानां चिरं विनचिन्तान पङ्के जोल्लासः समान
सागरनन्ने लसे भासयति ... श्रीनिवासगुरुभानुः १५५
वस्वं नित्यमेमोभयं देवं प्राप्यते १५३ मोहान्धकारहरणमिति मोहान्धकारहरणे अज्ञानान्धकारनाशने संसारे हलसागरे तरणे सपाद्य
हेलसागरे वेलामिति को सम स्त्रैप्ति मनोरथा पूरक रणमल्पमेव तमेन दापी कृतः नमुक्ति पादिनं निरवतरं पूरकं राणां इशितामुक्तिः
श्रीपरमशिवे अखण्डमपारानन्दानन्दकं रूपधर्मं तदिनां सचितमधर्यति १५४ अज्ञानान्धविहितेनेति अज्ञाना ... अन्धविहितानाम
ज्ञानैर्वाध्यमन्यत्वं समस्तविहितानां हरणम भर्थः चिरं चिन्तने चिन्तानपङ्के जो उल्लासः चिरं चिन्तनं विन्तान मेवपङ्के जं कमलं तस्य उल्लासः विका
सो येन सः मानसगगने तलं मानसमनन्तं हेवगगन नलं सोम ... लसम श्रीनिवासगुरुभानुः श्रीनिवासः श्रीमहाविष्णुगुरुः सत्ववमा
नुः सहस्रकिरणः भासयति प्रकाशयति एतावता गुरुदेवतयोरैक्यं भावनमेवात्मपूकारणं साधनमितिपुनिया दितिमवति १५५
इति श्रीसच्चिदानन्दसरस्वतीविरचिता आर्याव्याख्या समाप्ता ॥